ज्ञानज्ञेयांतरे तस्मिन्मनो नामापरो गुणः १०० विचारयति येनार्थं निश्चये साध्व
साधुनी द्वादशत्वपरत्वे च बुद्धिर्नाम गुणः स्मृतः १ येन संशयपूर्वेषु बोद्धेष्वेषु
वसति अथ द्वादशके तस्मिन्महत्वं नामापरो गुणः २ महासत्वोल्पसत्वो वा
जंतुर्येनानुमीयते २ ॥

र्थं संशयात्मकं मनोऽपेक्षत इत्यर्थः व्यवस्यति निश्चिनोति मूर्तेंद्रियमनांस्यपेक्ष्य बुद्धेर्द्वादशत्वं २ बुद्धिद्रव्यस्योपादानसत्वं। तस्य रजस्तमोभ्यामत्यंताभिभवमध्यता किंचिदभिभवे महत्वं। तस्यात्मत्वादिकं देहात्मकर्त्रात्मासंगमविवादादिकं देहोत्मकार्त्रीणामासंगविवादादिनिश्चयद्वारेणानुमीयते ज्ञायते अक्षरार्थः स्पष्टः ३

मो०
४६८

468

अहंकर्त्तेति। येन सत्त्वेन अयं अहंकर्त्ता ममायं निश्चय इति मन्यते सत्त्वत्र मनस सैव चतुर्दशो गुणः सत्त्वमपेक्ष्य बुद्धिनिश्चयप्रकाशकेहमर्थेपि वा स्यानपेक्ष्यप्रकाश
कत्वलक्षणं स्वप्रकाशत्वं नास्तीत्यर्थः ४ कलाः प्राणाः श्रद्धा खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोन्नं अन्नाद्वीर्यं तपो मंत्राः कर्म लोकेषु नाम चेति श्रुतेः।

अहंकर्त्तेति चाप्यन्यो गुणास्तत्र चतुर्दशः ममायमिति येनायं मन्यते न ममेति च ४
अथ पंचदशो राजन गुणास्तत्रापरः स्मृतः पृथक्कलासमूहस्य सामग्र्यं तदिहोच्यते ५

क्ताः षोडशतासां समूहस्य सामग्र्यं वासनात्मकं जगदहं कर्त्तव्यमस्मि। यथोक्तं वासिष्ठे यत्राहं त्वं जगत्तत्र पूर्वमागत्य तिष्ठति। तस्मिन्नस्तं गते पीयं शोच्यः परमपंडु
वनत्रयमिति। वासनाप्यहंकारद्वारा स्वकार्यं जगत्प्रकाशयतीति न स्वप्रकाशेत्यर्थः ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम०
४६८

गुणा इति तत्र वासनायां तु पादानत्वेनो गुणः त्रिगुणात्मत्वात् संघातरूपजगदंकुरबीजभूतो विद्यासंज्ञको गुणः यो ऽहमस्मि सुषुप्तावस्थायां न मो ऽज्ञानं यदीजं स्वगवोध
योऽस्तीति स्मृतेः सौषुप्ताज्ञानस्य संहतत्वेनाभासमानत्वात् संघातेऽपि लौकिकानुभवापेक्षोः संहतत्वविवक्षया रूपशब्दः तत्र कस्मादपरिच्छिन्नत्व [illegible]
पूर्वापरविचारणा यदा ज्ञानेपदार्थे स्ववासनानां प्रकीर्तितेति निवासितस्थो क्रोडीकृतलक्षणवासनाद्वारा सौषुप्ताविद्यापि ब्रह्मसृष्टेजनयतीति तन्नतस्या अपि वास्या
नपेक्षप्रकाशकत्वमस्तीति नासावपि स्वप्रकाशा तथा यस्मिन्यो ऽहं से सौषुप्ताज्ञाने प्रकृतिर्मायाख्या किंतु स्वप्रकाश इत्येतेनोक्तो गुणो ऽस्याश्रितो कल्पितरूपत्वे
रूपगुणकी इत्यर्थः मायाशबले ब्रह्मणि पर्व सौषुप्ताज्ञानमध्यस्तमित्यर्थः अतएव सौषुप्तं प्रकृत्य नरीपपारमार्थिकरूपापेक्षया एव सर्वेश्वर एव सर्वज्ञ इत्यादिरिमां रू

गुणत्वव्यापारत्वसंघातरूपबोधः प्रकृतिर्यत्किंचिदिस्येतो गुणो यस्मिन्न
मायाश्रितो ॥ ६ ॥ श्रीकृष्णाय नमः श्रीरामनारायणनमः श्रीराधाः

केवलस्येश्वरत्वं समाम्नातं विवक्षाभेदाज्जीवमप्येनं वदंति यदाहुर्वार्त्तिकाचार्या अपि जीवस्य देहाभिमानत्वे सार्वज्ञ्यमस्तीति मणिडूनवहतारा सोमसूर्योदयोऽपि
क्षितिर्निर्विषयमिहाल्पयास्यप्रद्योतयेत् सहजलयस्तनुसंघातये ज्योतिरंतः त्रिभुवनमपि सूक्ष्मस्थूलभेदं क्रमेणेति एतयो स्वप्रकृतित्वं ज्ञेयो गुणा
त्वे दृश्यत्वाद्देवतयादि स्वपरोन्मुखमिव प्रकृत्या चिदात्मा दृश्यते चंद्रेण राहुरिव चिदात्मना प्रकृतिः प्रकाश्यते अतोऽपयस्य साधकं तत्त्वतत्त्रांतर मिन्न
नुगमातरतयोः परस्परापेक्षया बाधत्वात् स्वस्वकार्यप्रकाशे परस्परापेक्षत्वाच्च न द्वयोरपि बाध्यानपेक्षप्रकाशकत्वलक्षणं स्वप्रकाशत्वमस्तीति प्र
कृतेर्निकृष्टत्वेन न स्वप्रकाश इति भावः ६ ॥

मो० ४६९

४६१

तत्रप्रकृतिकार्यमाहसुखेति ७ प्रकृतिकार्यमाहऊर्ध्वमिति। कालः अविद्याख्यः षोडशगुणात्मकः तदुपाधिर्जीवः कालसंज्ञः तस्यसदसद्वासनामयत्वात्।
कृतत्रेतादिकालरूपत्वंप्रागुक्तं नप्रसक्तमेवंविंशत्यासंख्यातं ८ महाभूतानिदेहारंभकाणिआकाशव्यतिरिक्तानि। सम्भावयोगः इहघटोस्तीत्यादिव्यपदेशः असम्भाव
योगः इहघटोनास्तीत्यादिर्व्यपदेशः यद्वाप्रमाभ्रमविषयौसदसम्भावयोगौज्ञेयौ ९ विधिः वासनाबीजभूतौधर्मौ शुक्लंवासनोद्बोधकः संस्कारः बलं

सुखासुखेजरामृत्यूलाभालाभौप्रियाप्रिये इतिचैकोनविंशोयंद्वंद्वयोगइतिस्मृतः ७ ऊर्ध्वंचैकोनविंशत्याकालोना
मापरोगुणः इतीमंविद्धिविंशत्याभूतानांप्रभवाप्ययं ८ विंशकस्त्वेषसंघातोमहाभूतानिपंचच सदसद्भावयोगौतुगु
णावन्यौप्रकाशकौ ९ इत्येवंविंशकस्त्वेवगुणाः सम्प्रवयेस्मृताः विधिः शुक्लंबलंचेतित्रयएतेगुणाः परे १० विंश
तिर्दशचैवंहिगुणाः संख्यानतः स्मृताः समग्रायत्रवर्तंतेतच्छरीरमितिस्मृतं ११ अव्यक्तंप्रकृतिंत्वासांकलानांक
श्चिदिच्छति व्यक्तंचासांतथाचान्यः स्थूलदर्शीप्रपश्यति १२ ॥ ॥

राम० ४६९

वासनाविषयपाशस्तुकूलोपलः संघातधर्मोलेनश्वेतेषांपृथग्ग्रहणं १० विंशतिर्दशचेतित्रिंशत्संघातः शरीरं ११ अस्यत्रिंशकस्योत्पत्तौमतांतरमाह
अव्यक्तमितिअव्यक्तंप्रधानं। प्रकृतिमुपादानं। कालानांत्रिंशत्संख्यानां। कश्चित्निरीश्वरसांख्यः व्यक्तंपरमाणवः चकारात्अव्यक्तंकालादृष्टादि
स्थूलदर्शीकणादादिः १२

अव्यक्तं कापिलाः अज्ञं चतुर्विधाः परमाणवश्चेति चार्वाकाः ईयीं काणादाः चतुष्टयीं व्यवहारे स्वरूपमभ्युपगतां जीवेश्वरौ स्वस्वोपाधियुक्तौ पश्यंति तत्स्वविषयीकुर्वंति
इदं सर्वमप्यस्माकमध्यात्मचिंताऽविरुद्धं व्यावहारिकेषु येषु अनात्मिकेषु नातीवाभिनिवेष्टव्यमित्याशयः १३ कृततदभिनिवेशव्यमत आह येयमिति इयमि
ति प्रत्यक्षेणाभिनीयप्रदर्शयति प्रकृतिरधिष्ठानमात्रत्वेनोपादानं अव्यक्तात्रिगुणकवत्तत्त्वा नगरहीनाद्यदृष्टो दृष्टेत्यादिस्कृतेर्वा ध्वनत्तातीतत्वात् कलाभिरुक्ता
भिर्वर्विशतत्स्याभिः इदं प्रावेत् तीयामायया कलात्मनाव्यक्ततां दृश्यतां गतेत्यर्थः याचनिष्कलावास्यानपेक्षप्रकाशकत्तया स्वयंवनत्रिशकारद्भ्यास्वयंप्रो

अव्यक्तं परिवाद्यक्तं ईयीमथ चतुष्टयीं प्रकृतिं सर्वभूतानां पश्यंत्यध्यात्मचिंतकाः १३ येयं प्रकृतिरव्यक्ता कलाभिर्व्यक्ततां
गता अहं च त्वं च राजेंद्र ये चाप्यन्ये शरीरिणः १४ बिंदुन्यासादयोऽवस्थाः शुक्रशोणितसंभवाः यासामेव निपातेन कललंना ले२
मजायते १५ ॥ ॥ ॥

तिः सैव त्वं चाहं चान्ये च स्मः सर्वेषामप्यस्मभूत आत्मेत्यर्थः घटमणिकमल्लिकाद्याकाशानामिव उपाधिप्रतिसंधानमंतरेणाभेदस्याविभाव्यमानत्वात् सैवास्माकं
तन्मात्रत्वमिति भावः न च स्वस्यापि मुकुरमुखवद्बाह्यापेक्षप्रकाशत्वमुक्तं। नाप्रतिबिंबस्यैव स्वप्रकाशेनालस्येति दिक् १४ एवं चिद्दृश्याभिप्रायेणकाशीत्याद्यभि
प्रायानुपपत्तिमुक्त्वा जडांशाभिप्रायेणापि तामेव विवृणोति बिंदुन्यासेति रेतःसेकः ततः शुक्रशोणितसंयोगाद्भवंतिताः निपातेन मिश्रणेन। कललं परस्परावि
विक्तं १५

१९ कलानांपरिणामवर्त्तीनांपृथगर्थानांरूपादिमकाशार्थानांप्रतिभेदः रूपभेदः २० सोऽस्याग्निरिवविस्फुरणानिर्नचाति २१ एवंपरिणामभेदान्तद्व्यभेदस्सुप
त्पश्नोत्तरलक्षणयोरिदंहिभेदाः स्कासिकस्यासीतिप्रश्नस्यानुपप त्तिमुक्तोरहस्यानित्यत्वाऽपितद्योगमाहतस्येति २३ आदित्याद्रूपेकांतेनमणौलोहसं

मो०
६७०

५७०

कललात्तबुद्बुदोत्पत्तिः पेशीचबुद्बुदात्स्मृता पेश्यास्त्वंगाभिनिर्वृत्तिर्नखरोमादिकांगतः १६ संपूर्णेनवमेमासिजंतोर्जा
तस्यमैथिल जायतेनामरूपत्वंस्त्रीपुमान्वेतिलिंगतः १७ जातमात्रंतुतद्रूपंदृश्यतामनसांगुलि कौमारंरूपमापन्नो
रूपंतेनोपलभ्यते १८ कौमाराद्यौवनंचापिस्थाविर्यंचापियौवनात् अनेनक्रमयोगेनपूर्वंपूर्वेनलभ्यते १९ कलानां
पृथगर्थानांप्रतिभेदः क्षणोक्षणे वर्त्ततेसर्वभूतेषुसौक्ष्म्यात्तुनविभाव्यते २० नचैषामप्ययोराज्ञनलक्ष्यतेप्रभवोनच
अवस्थायामवस्थायांदीपस्येवार्चिषोगतिः २१ तस्याप्येवंप्रभावस्यसदश्वस्येवधावतः अजस्रंसर्वलोकस्यकः कु
तोवानवाकुतः २२ कस्येदंकस्यवानेदंकुतोवेदंन कुतः संबंधः कोस्तिभूतानांस्वैरप्यवयवैरिह २३ यथादि
त्यान्मणेश्चापिवीरुद्भ्यश्चैवपावकः जायतेएवंसमुद्यात्कलानामिवजंतवः २४ ॥ ॥ ॥ ॥

पा२

राम०
६७०

वधात् वीरुद्भ्यः मंथनादिनाकलानांसमुदायात्तद्वशंदोनर्थकः पादस्फुरणाद्येः २४ ॥ ॥ ॥ ॥

आत्म नीतिसार्द्ध श्लोकः ॥ आत्मानं देहात् आत्मानं निष्कलं देहात्मवन्निष्कलात्मा नमपि पश्यसंदिग्धं पश्यसि तर्हि व्यलिह स्वं एकात्मपि वितानव्यवनस्मिन्नपि
देहे निष्कलमेव कुतो न पश्यसीत्यर्थः देहात्मज्ञानवह्नाने देहात्मज्ञानबाधकं ज्ञानं यस्य भवेत् स नैव छिन्नमपि मुच्यत इति देहज्ञानं दर्शितं मुद्गज्ञानेनित्तम ज्ञात्वा केचिद्
हमध्यममर्धेन पठंति २५ कृतवान्उचितक्रियावान्भावेनिष्ठा २७ धर्मो ऽर्थः काम इत्य संकीर्णो त्रयः धर्मार्थयोर्धर्मे कामयोः कामार्थयोश्चेति संकीर्णाः हि

आत्मन्येवात्मनात्मानं यथा त्वमनुपश्यसि एवमेवात्मनात्मानमन्यस्मिन्किं न पश्यसि २५ यथात्मनि परस्मिंश्च समतामध्यवस्यसि
अथ मां कामिकस्येति किमर्थमनुपृच्छसि २६ इदं मे स्यादिदं नेति इहेच्छा मुक्तस्य मैथिल कामिकस्य कुतो वेति वचनैः किं प्रयो
जनं २७ पितृमित्रेष्वमध्यस्थे विजये संधिविग्रहे कृतवान्मां महीपालः किं तस्मिन्मुक्तलक्षणं २८ त्रिवर्गे सप्तधाव्यक्तं यो
न वेदेह कर्मसु संगवान्यस्त्रिवर्गेण किं तस्मिन्मुक्तलक्षणं २८ प्रियेष्वप्यप्रियेष्वपि दुर्बलेबलवत्स्वपि यस्य नास्ति समं
चक्षुः किं तस्मिन्मुक्तलक्षणं २९ तदस्युक्तस्य ते मोक्षे योभिमानो भवेन्नृप सुहृद्भिः स निवार्यस्ते विरक्तस्येव भेषजं ३०
तानि तानि तु संविक्ष्य संगस्थानान्यरिंदम आत्मनात्मनि संपश्येत्किमन्यन्मुक्तलक्षणं ३१ ॥ ॥ ॥ ॥

कास्त्रयः धर्मार्थकामानां त्रिसंकीर्णो त्रिक एक इति सप्तधा त्रिवर्गो सक्तो न मुच्यत इत्यर्थः २९ अविरक्तस्य अपथ्यशीलस्य ३० तानीति संगस्थानानि स्त्र्या
दीनि आत्मन्येव संपश्येत् न तु बहिः आत्मक्रीड आत्मरतिर्यः स एव मुक्त इत्यर्थः ३१ ३१ ॥ ॥ ॥ ॥ ॥

चतुर्वर्गेषु शब्दनीयभोगभोजनाच्छादनेषु प्रसक्तानि संगस्थानानि पृथिव्यादीनि ३१ यदुक्तं प्रवेशे लेक्षतः केन मम मद्राज्ये पुरेपि वेत्ति तत्र नव पुरादीनां स्वं स्वं एव
नास्तीत्यास्य रश्मामिति पृथ्वीपतिः पुरेस्तीति पृथ्वीव्यर्थ्यापुरे भोगगेहस्तीति पुरंस्वार्थे गेहेशोपि मे चस्तीति गेहस्यार्थे मे चस्योप्येकदेशोस्तीति तदीय प्रदेशो

इमान्यन्यानि सूक्ष्माणि मोक्षमार्गप्रसक्तानि चित चतुर्वर्गप्रसक्तानि संगस्थानानि मे शृणु ३२ यस्मात्पृथिवी कृत्स्ना मेकच्छ
त्रां प्रशास्तीह एक एव स एव राजा पुरमध्यावसत्युत ३३ तस्मिंस्तु रैवैकमेवास्य गृहं यदधितिष्ठति गृहे शयनमप्येकं निशायां यत्र
लीयते ३४ शय्यार्द्धं तस्य चाप्यत्र स्त्रीपूर्वमधितिष्ठति तदनेन प्रसंगेन फलेनैवेह युज्यते ३५ एवमेवोपभोगेषु भोजनाच्छा
दनेषु च गुणेषु परिमेयेषु निग्रहानुग्रहं प्रति ३६ परतंत्रः सदा राजा स्वल्पे सोपि प्रसज्यते संधिविग्रहयोगे च कुतो राज्ञः स्वतंत्र
ता ३७ स्त्रीषु क्रीडाविहारेषु नित्यमस्यास्वतंत्रता मंत्रे चामात्यसमितौ कुतस्तस्य स्वतंत्रता ३८ यदा त्वाज्ञापयत्यन्यां
स्तत्रास्योक्ता स्वतंत्रता अवशः कार्यते तत्र तस्मिंस्तस्मिन् क्षणे स्थितः ३९ स्वप्तुकामो न लभते स्वप्तुं कार्यार्थिभिर्जनैः शय ६
नेचाप्यनुज्ञातः सुप्त उत्थाप्यतेवशः ४० स्नाह्यालभ पिव भक्ष्य जुहुध्यग्नीन्यजेत्सपि ब्रवीहि शृणु चापीति विवशः कार्यते परैः

नरेभ्यर्थे अल्पेनैव निर्वाहसिद्धेरधिकेन ममता मोहमात्रं यथोक्तं गोशतादपि गोक्षीरं प्रस्थं धान्यशतादपि प्रासादादपि खट्वार्द्धं शेषाः परविभूतयः इति ४१

४६ सर्वराज्यदुःखानुत्कायत्तत्रसुखंतत्स्वैवनामपस्तीत्यादेवस्वेइति ४८ राज्याभिमानेनतापाधिकस्त्वादृतदिति ४९ अमुक्तःनित्यसंबद्धः ५२ कइति

अभिगम्याभिगम्यैवंयाचतेसततंनराः नचाप्युत्सहतेदातुंवित्तरक्षीमहाजनान् ४२ हानेकोशक्षयोप्यस्यैवंस्वास्याप्रयच्छ
तः क्षरोनास्यापवर्ततेतदृष्टावैराग्यकारकाः ४३ मार्गाक्छूरांस्तथैवाध्यानेकस्थानेपिशंकते भयमप्यभयेराज्ञोयैश्चनि
त्यमुपास्यते ४४ तथाचैतेप्रदुष्यन्तिराज्ञन्येकीर्तितामया तेथैवास्यभयंतेभ्योजायतेपश्ययादृशं ४५ सर्वःस्वेस्वेगृहे
राजासर्वःस्वेस्वेगृहेगृही निग्रहानुग्रहान्कुर्वन्तुल्योजनकराजभिः ४६ पुत्रदारास्तथैवात्माकोशोमित्राणिसंचयाः प
रैःसाधारणाःसर्वेतैस्तैरेवास्यहेतुभिः ४७ हतोदेशःपुरंदग्धंप्रधानःकुंजरोमृतः लोकसाधारणेष्वेषुमिथ्याज्ञानेनतप्य
ते ४८ अमुक्तोमानसैर्दुःखैरिच्छाद्वेषभयोद्भवैः शिरोरोगादिभीरोगैस्तथैवाभिनिमंत्रिभिः ४९ द्वंद्वैस्तैस्तैरुपहतः
सर्वतःपरिशंकितः बहुप्रत्यर्थिकंराज्यमुपास्तेगणयन्निशाः ५० तदल्पसुखमत्यर्थंबहुदुःखमसारवत् तृणा
ग्निज्वलनप्रख्यंफेनबुद्बुदसंनिभं ५१ कोराज्यमभिपद्येतप्राप्यचोपशमंलभेत् ममेदमितियच्चेदंपुरंराष्ट्रंचमन्यसे ५२
बलंकोशममात्याश्चकस्यैतानिनवानृप मित्रामात्यपुरंराष्ट्रंदंडः कोशोमहीपतिः ॥ ॥ ॥ ॥

दं१

प्राप्यकोभिपद्येतनकोपीत्यर्थः अतः उपशममेवलभेत्प्राप्नुयात् ५२ ५२ ॥ ॥ ॥ ॥ ॥

मो०
४७२

चिरंद्वविशिष्टोपयाः न्योन्याश्रयेणातिष्ठतिरवंमित्रादयः समनान्तेनेषांप्रधानगुणाभावोस्तीत्यर्थः ५५ त्रयत्रयाः दृष्टिक्षयस्यानाख्याः नीतिशास्त्रे
क्ताः ५६ संश्रयेति पयाः चेत्तनः कोषः स्वपुष्ट्यैमित्रादीनपुंक्तेरवमित्रादयोपिकोषमिति जरयोरेवोपकार्योपकारकभावः ननुजराजनयोः ५८ असती

संयोगस्यास्य राज्यस्य त्रिदंडस्येव तिष्ठतः अन्योन्यगुणयुक्तस्य कः केन गुणतोधिकः ५४ तेषु तेषु हि कालेषु तत्तदंगं विशिष्यते
येन यत्सिध्यते कार्यं तत्प्राधान्याय कल्प्यते ५५ सप्तांगश्चैव संघातस्त्रयश्चान्ये नृपोत्तम संभूय दशवर्गोयं भुंक्ते राज्यं हि राज
वत् यश्च राजा महोत्साहः क्षत्रधर्मरतो भवेत् ५७ स तुष्येद्दशभागेन ततस्त्वन्यो दशावरैः नास्त्यसाधारणो राजा नास्ति रा
ज्यमराजकं ५८ राज्यसति कुतो धर्मो धर्मे सति कुतः परं योप्यत्र परमो धर्मः पवित्रं राजराजयोः ५९ पृथिवी दक्षिणा
यस्य सोश्वमेधेन युज्यते साहमेतानि कर्माणि राजदुःखानि मैथिल ६० समर्था शतशो वक्तुमथवापि सहस्रशः
स्वदेहेनाभिसंगो मे कुतः परपरिग्रहे ६१ न मामेवंविधां युक्तामीदृशं वक्तुमर्हसि ननु नाम त्वया मोक्षः कृत्स्नः पंचशि
खात्श्रुतः ६२ सोपायः सोपनिषदः सोपासंगः सनिश्चयः तस्य ते मुक्तसंगस्य पाशानाक्रम्य तिष्ठतः ६३ छत्रा
दिषु विशेषेषु पुनः संगः कथं नृप श्रुतं ते न श्रुतं मन्ये मृषा वापि श्रुतं श्रुतं ६४ ॥ ॥ ॥

तिपरः परंमोक्षसुखं ६१ देहसंसत्वसंबंधेन संकरकर्तृत्वं ६२ उपायो निदिध्यासनं उपनिषत् श्रवणमनने उपासंगः ध्यानांगानि यमादीनि
निश्चयः नरेहं ब्रह्मात्मैकत्वानुभवः ६३ पाशानाक्रम्य कामादीन् जित्वा ६४ ॥ ॥ ॥ ॥ ॥ राम०
४७२

क्रांतशान्त्यैतेस्तयामक्रांतनज्ञातंमप्यारंभेन। क्रांतसंकाशंशान्त्याभासरूपंक्रांतशान्त्यैतयाक्रांतशान्त्यैतयाक्रांतन्त्राकरिणि ६४ संज्ञामुवाचारंभ

अथवाक्रांतसंकाशंक्रांतमन्यच्चतुतया अथापीमासुसंज्ञासुलौकिकीषुप्रतिष्ठसे ६५ अभिसंगाविरोधाभ्यांवद
त्वप्राकृतोयथासत्वेनानुप्रवेशोहियोपलयिकृतोमया ६६ किंतवापकृतंतेनत्वयदिमुक्तोसिसर्वशः नियमोस्येव
वैरोगसुपतीनांवन्यवासिना ६७ अन्यमाविशयंत्साचमयाकिंकस्यदूषितं नपाणिभ्यांनबाहुभ्यांपादोरुभ्यांनचा
नघ नगात्रावयवैरन्यैः स्पृशामितानराधिप ६८ कुलेमहतिजातेनक्षीमताद्दीर्घदर्शिना नैतत्सदृशमिवकृत्यंस
हासह मिथः कृतं ६९ आस्थगागुरवश्चैवमत्थामान्यागुरुत्तमाः त्वंचाप्यगुरुरप्येवामेवमन्योन्यगौरवं ३१
७० तदेवमनुसंदृश्यवाच्यावाच्यंपरीक्षता स्त्रीपुंसोः समवायोपलयावाच्योनसंकरः ७१ यथापुष्करपर्णे
स्थंजलंतत्पर्णमस्पृशत् तिष्ठत्स्पृशतीतद्वदपिवत्स्यामिमैथिल ७२ यदिचाप्यस्पर्शस्तामेस्पर्शोज्ञानासिकंचन
ज्ञानेकृतमवीजंतेकथंतेनेहभिक्षुणा ७३ सगार्हस्थ्याश्रुनश्चत्वंमोक्षश्चानाप्यदुर्विदं उभयोरंतरालेवैवर्तसेमो

स्प॰२

रांगविकारेणनामधेयमितिस्मृतेनेनोम्नमात्रासुसंपन्नः ६७ अन्यंयोधमन्यतनवुद्धिसत्वमितिभावः अन्यागोरेवासश्चसन्यासिनोधर्मदृजितममकथिदोषा
तिति ७३ मोक्षवार्तिकः वार्तामात्राभिज्ञः नतुमुक्तः ७४ ॥

मो०

५७३

473

मुक्तात्वेहि माक्कथा वर्णसंकरमित्युक्तिरयुक्ता तत्राह नहीति। एकत्वविदात्मनः पृथक्त्वं पुंप्रकृत्योः भाव आत्मा अभावस्तत्स्वरूपत्वात्सकृतिः अनयोः समा
योगे। वर्णसंकरो न च घटेत ७५ कथं तर्हि वर्णसंकरो निषिध्यते इत्याशंक्य वर्णाश्रमाभिमानवतां हिंसा ह वर्णाश्रमा इति। अपृथक्त्विनः पृथक्त्वं पुंप्रकृत्योः
विवेकस्तद्रहितस्यातीति पृथक्त्वीतर स्यास्य अतएव अपृथक्त्वेन नानात्वेन वर्णाश्रमाः यस्य भांति दृश्याः अर्थाः येन सः जगतः पृथक्त्वसत्वं मत्वा न स्येत

नहि मुक्तस्य मुक्तेन ह्यैक्यत्वपृथक्त्वयोः भावाभावसमायोगो जायते न वर्णसंकरः ७५ वर्णाश्रमाः पृथक्त्वेन दृष्टा
यैस्तेऽपृथक्त्विनः नान्यदन्यदिति ज्ञात्वा नानात्वं दृश्यते न वर्तते ७६ पाणिना कुंडं तथा कुंडे पयः पयसि मक्षिका आश्रि
ता आश्रययोगेन पृथक्त्वेनाश्रिताः पुनः ७७ न तु कुंडेऽपयोभावः पयश्चापि न मक्षिका स्वयमेवाप्नुवंत्येते भावा
न तु पराश्रयं ७८ पृथक्त्वाद्राश्रमाणां च वर्णानामेवात्मनैव च परस्परपृथक्त्वाच्च कथं ते वर्णसंकरः ७९ ना
स्मि वर्णो न मा जाति न वैश्यो नावरा तथा न वराजन्यवर्णास्मि शुद्धयोनिरविल्लुना ८० ॥ ॥ ॥ ॥

दृष्ट्वा व्यभिचारान्न वर्णसंकर इत्यर्थः यदा त्वेवं जानाति अन्यत् शरीरं अन्यत् आत्मा न भवति इति तदा ज्ञात्वा न देवापरोक्षीकृतस्य स्थितायाः ममत्वं अनात् राम०
मस्वत्वं अन्यत्रापि न वर्तते इत्यर्थः ७६ पाणिः कुंडादयः एकदेशस्था अपि परस्परं न संकीर्यंते कुसराः न वैदेहकलोली भावं न गच्छंति। एवमाश्रमाणां व ५७३
र्णानां च आत्मनः सकाशात् भिन्नत्वाद्वा हि ते पृथक्त्वात् कथं वर्णसंकर इति श्लोकत्रयार्थः ७९ ॥ ॥ ॥ ॥

२१ द्रोणादयः पर्वताः मम पूर्वेषां सत्रेषु मघवता सह चिताः चयनेष्टकास्थानेन निवेशिताइत्यर्थः २२ तस्मिन् विख्यातप्रभावे कुले विनीता गुरुभिः शिक्षिता मद्वि-
धे मद्भर्तरि असति अग्नावेव सति नैष्ठिकं ब्रह्मचर्यं चाश्रित्य संन्यासं कृतवत्यस्मीत्यर्थः २३ सत्रप्रतिच्छन्ना कपटसन्यासिनी २४ स्वपक्षपरपक्षयोर्मध्ये वर्गस्था स्वपक्षे प-

प्रधानो नाम राजर्षिर्व्यक्तं ते श्रोत्रमागतः कुले तस्य समुत्पन्नां सुलभां नाम विद्धि मां २१ द्रोणश्च शतशृंगश्च वक्रद्वारश्च पर्व-
तः मम सत्रेषु पूर्वेषां चिता मघवता सह २२ साहं तस्मिन् कुले जाता भर्तर्यसति मद्विधे विनीता मोक्षधर्मेषु चराम्येका मुनि-
व्रतं २३ नास्मि सत्रप्रतिच्छन्ना न परस्वापहारिणी न धर्मसंकरकरी स्वधर्मेस्मि धृतव्रता २४ नास्थिरा स्वप्रतिज्ञायां ना-
समीक्ष्यप्रवादिनी नासमीक्ष्यागता चाहं सकाशं ते जनाधिप २५ मोक्षे ते भाविता बुद्धिं श्रुत्वाहं कुशलैषिणी तव मोक्षस्य चा-
प्यस्य जिज्ञासार्थमिहागता २६ न वर्गस्था ब्रवीम्येतत् स्वपक्षपरपक्षयोः मुक्तो व्यायच्छते यस्तु शांतौ यस्तु न शाम्यति
२७ यथा शून्ये पुरागारे भिक्षुरेकां निशां वसेत् तथाहं त्वच्छरीरेस्मिन्निमां वत्स्यामि शर्वरीं २८ ॥ ॥ ॥ ॥

क्षपातेन स्थिता सती नाहं ब्रवीमि अपि तु त्वद्धितार्थं ब्रवीमीति भावः ननु ज्ञातं तव स्वमेकिं त्वहींयैर्वाक्यैरित्याशंक्याह मुक्त इति निकारो भिन्नक्रमः यो न व्यायच्छ-
ते महद्भवनस्य जयार्थं आयासं वादश्रमं न करोति यस्तु शांतो ब्रह्मणि न शाम्यति समुक्तः अन त्वं तु तस्यापि आहरेणा महता अवशो युक्त इति भावः २७
स्वस्य यामेकरात्रवासित्वं द्योतयति यथेति २८

मो०
५७४

५७५

८९ हेतुमंतियुक्तिमंति। अर्थवंतिप्रयोजनवंति। नाधिजगौनाधिगतवान् उक्तं खंडनंतुं नसमर्थोबभूवेत्यर्थः एतेनगार्हस्थ्येमुक्तिर्दुर्लभाऽतः सन्यास एव श्रेयानिति
सुलभामतमेवसिद्धांतइतिदर्शितं ९० इतिनैलकंठीयेभारतभावदीपेशांतौमोक्षधर्मेषुसुलभाजनकसंवादाख्यप्रकाशः शांतौपरिचतुस्त्वारिंशः सन्यास

साहंमानप्रदानेनवागर्घ्येणचार्चिता। सुप्तासुशरणंप्रीताप्रोष्यागमिष्यामिमैथिल ८९ भीष्मउवाच इत्येतानिसवाक्यानि
हेतुमंत्यर्थवंतिच श्रुत्वानाधिजगौराजाकिंचिदन्यदतःपरं ९० शांतौमोक्षधर्मेषुसुलभाजनकसंवादः युधिष्ठिर
उवाच कथंनिर्वेदमापन्नःशुकोवैयासकिःपुरा एतदिच्छाम्यहंश्रोतुंपरंकौतूहलंहिमे १ अव्यक्तव्यक्ततत्वानांनिश्चयं
बुद्धिनिश्चयं वक्तुमर्हसिकौरव्यदेवस्याजस्ययाकृतिः २ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सप्तेसप्तसुकाख्यानंहूंनेनसुकचरितेनैवरस्यंयजिप्रश्नोत्तरमुखेनकथयितुमादिनानिर्वेदवैराग्यंप्रसन्यासेमुख्यंविशेषणंपरहेरवविरजेत्तरहरेवप्रव्रजेदितिश्रुतेः १
अव्यक्तंकारणंव्यक्तंकार्यं। तत्वंतयोरनारोपितरूपंब्रह्मतेषांनिश्चयं बुद्धिस्थंनारायणास्यकृतिर्लीलाख्याकृतिरितिच्छेदः सगुणंरूपंअत्रचप्रथमस्यप्रश्नस्योत्त राम०
रंशुकोत्पत्तिः इतरयोरुत्तरंशेषग्रंथइतिविभागः २ २ २ २ २ २ २ २ २ २ २ ५७४

स्वाध्यायं वित्तं पितामहपरंपरयापरिगृहीतं वेदभागं अध्याप्य ३ हेतोः येन च यथा हि पिता नानधिगतान् ... दानतो पान् अर्थान् अन्वशात् अनुशासितवान् ननु च अध्या
प्यति शरत्न एव स्वाध्यायग्रहणमुच्यते न त्वर्थतो ऽपि वेत्रोयमधीतन् इत्य क्षरोच्चारणमात्रेः वीति शब्दप्रयो ... गादिति वाच्यं । अध्ययनविधेर्वाक्योपक्रमे राठकार्थस
र्शितत्वात् न त्याहि यतिन्याजमचिविदं स्वाध्यायं न तस्य वाच्यपि भोगा अस्ति यद्दीयः शेषाल्पकं अशोनि नहि प्रवेर सुकृतस्य पंथामिति तस्मात्स्वाध्यायो ध्येतव्य

भीष्म उवाच प्राक्कृतेन सुकृतेन चरंत्यमकुतोभयं अध्याप्य कृत्स्नं स्वाध्यायमन्वशाद्वै पिता सुतं ३ व्यास उवाच धर्मं पुत्र नि
षेवस्व सुतीक्ष्णौ च हिमातपौ क्षुत्पिपासे च वायुं च जय नित्यं जितेंद्रियः ४ सत्यमार्जवमक्रोधमनसूयां दमं तपः अहिंसां
चानृशंस्यं च विधिवत्परिपालय ५ सत्ये तिष्ठ रतो धर्मे हित्वा सर्वमनार्जवं देवतातिथिशेषेण यात्रां प्राणस्य संलिह
६ फेनमात्रोपमे देहे जीवे शकुनिवत्स्थिते अनित्ये प्रियसंवासे कथं स्वपिषि पुत्रक ७ ॥ ॥ ॥

इति सुकृतमार्गो ज्ञाने वेदस्याक्षरग्रहणे निष्फले इत्युक्ता विधीयमानस्याध्ययनस्यार्थज्ञानपर्यंततावसीयते अयं मंत्रः प्रोगेव व्याख्यातः काव्यमधीते या
... नीयमधीते कारणा दम धीते इत्यर्थग्रहणेः प्यधीति प्रयोगदर्शनात् मेत्रोयमधीत इत्यक्षरमात्रोच्चारणे संगोणा इति मंतव्यं अन्यथाः ध्याप्यान्वशादिति क्रम
मात्रं विधीयते न च अर्थं अनुशासित समर्पणे तु वाक्यस्यार्थ एव स्यादिति दिक् ५ संलिहस्व ग्रासस्वाद स्वादु विवेकं मा कार्षीरित्यर्थः ६ स्वपिषि पुरुषार्थे ... ते
न प्रवर्तसे ७

मो०
५७५

प्रत्तुषुकाम्यादिषुअंतरंछिद्रं ८ नधावसिस्वंयुक्तंवापरंत्राणंनयासि १० अपथाअपथेन १३ अद्यकालिकयावर्त्तमानमात्रदर्शिन्या १४ कूलपातंमहानदी

475
अप्रमत्तेषुजाग्रत्सुनित्ययुक्तेषुशत्रुषु अंतरंलिप्समानेषुबालस्त्वंनावबुध्यसे ८ अहःसुगच्छमानेषुक्षीयमाणेतथायु०
षि जीवितेलिख्यमानेचकिमुत्थायनधावसि ९ ऐहिलौकिकमीहंतेमांसशोणितवर्द्धनं पारलौकिककार्येषुप्रसुप्ता
भृशनास्तिकाः १० धर्माययेभ्यसूयंतिबुद्धिमोहान्वितानराः अपथागच्छतांतेषामनुयातापिपीड्यते ११ येतुशिष्टाःश्रुति
परामहात्मानोमहाबलाः धर्म्यंपंथानमारूढास्तानुपास्स्वचपृच्छच १२ उपधार्यमतंतेषांबुधानांधर्मदर्शिनां नियच्छपर
याबुद्ध्याचित्तमुत्पथगामिवै १३ अद्यकालिकयाबुद्ध्यादूरेश्वइतिनिर्भयाः सर्वभक्ष्यानपश्यंतिकर्मभूमिमचेतसः १४
धर्मनिःश्रेणिमास्थायकिंचित्किंचित्समारुह कोशकारवदात्मानंवेष्टयन्नावबुध्यसे १५ नास्तिकंभिन्नमर्यादंकूल
पातमिवस्थितं वामतःकुरुविस्रब्धोनरंवेणुमिवोद्धृतं १६ कामंक्रोधंचमृत्युंचपंचेंद्रियजलांनदीं नावंधृतिमयींकृ
त्वाजन्मदुर्गाणिसंतर १७ मृत्युनाभ्याहतेलोकेजरयापरिपीडिते अमोघासुपतंतीषुधर्मपोतेनसंतर १८ तिष्ठंतंचश राम०
यानंचमृत्युरन्वेषतेयदा निर्वृतिंलभतेकस्मात्कस्मान्मृत्युनाशितः १९ ॥ ॥ ॥ ॥ ॥ ५७५

दूरंश्वः धृतिप्राणादिभिर्धारणायोगश्चमयः १७ अमोघासुआयुर्हरणेनसफलासुरात्रिषुधर्मपोतेनधर्मनौकया १८ १९ ॥

संचिन्वानकं धनादि संचयपरं २० अंधकारे संसारे दीपो ज्ञाने २४ संवासः छेत्तुं योग्यः संध्या सद्भिः पाठे उच्छेत्तुं योग्यः संध्यां सद्भिः पाठे संध्या द्वयमेव स्थानीयं यस्य सु
ककुभोपमौ २५ चक्षुः ज्ञानं मरणोत्तरे यं अंधवत्‌ यदि नमवसीत्यर्थः परं परलोकं। आत्मानं वा २६ परिगतं प्राप्तं वेदना शरीरे यमलोके पातनाशरीरं वै

पाद

संचिन्वानकमेवैनं कामानामवितृप्तकं वृकीवोरणमासाद्य मृत्युरादाय गच्छति २० क्रमशः संचितशिखो धर्मबुद्धिमयो
महान् अंधकारे प्रवेष्टव्यो दीपो यत्नेन धार्यतां २१ संपतन् देहजालानि कदाचिदिह मानुषे ब्राह्मण्यं लभते जंतुस्तत्पुत्र प
परिपालय २२ ब्राह्मणस्य तु देहोयं न कामार्थाय जायते इह क्लेशाय तपसे प्रेत्य त्वनुपमं सुखं २३ ब्राह्मण्यं बहुभिरवा
प्यते तपोभिस्तल्लब्ध्वा न रतिपरेण हेलितव्यं स्वाध्याये तपसि दमे च नित्ययुक्तः क्षेमार्थी कुशलपरः सदा यतस्व २४
अव्यक्तप्रकृतिरयं कलाशरीरः सूक्ष्मात्मा क्षणत्रुटिशो निमेषरोमा संध्यांसः समबलशुक्लकृष्णनेत्रो मासांगो द्रव
तवयो ह्ययो नराणां २५ तं दृष्ट्वा प्रसृतमजस्रमुग्रवेगं गच्छंतं सततमिहानवेक्ष्यमाणं चक्षुस्ते यदि न परप्रणेतृ नेयंध
मेतं भवतु मनः परं निशाम्य २६ ये चात्र प्रचलितधर्मकामवृत्ताः क्रोशंतः सततमनिष्टसंप्रयोगाः क्लिश्यंतः परिग
तवेदनाशरीरा बह्वीभिः सुभृशमधर्मकारणाभिः २७

तत्र यान्सा भवंतीति शेषः अधर्मकारणाभिः अधर्मक्रियाभिः २७ ॥ ॥ ॥ ॥ ॥

मो० एतत्तमर्पंस्कर्त्स्वामीतिराजानमाम्मासयतिराजेति शुभाशुभस्यउत्तमाधमवर्णोजातस्यासुकृतेनप्रवर्त्तकत्वात्सुकृतिनांलोकान्द्धतिधारयतेनप्राप्नोतीत्यर्थः
४७६ स्वनुपगतेनानायोनिसहस्रेषुप्राप्तेमोक्षेस्वर्गेमोक्षेचसाधुः नृपः प्राप्नोतीत्यर्थः २८ गुरुद्रोहिसंगादुर्गतिमाहश्वानइतिनराणांकरंनयत्रेतस्मिन्नरकेरुधि
476 रपाः कीटाः गुरूणांमातापित्रप्रभृतीनांवचनंनुदन्तिदूरीकरोतितेगुरुवचनतुदउपरतेसति २९ नियताः विहिताः स्वयंभुवावेदेनब्रह्मस्वयंभुइतिस्मृतेः

राजासदाधर्मपरःशुभाशुभस्यगोप्तासमीक्ष्यसुकृतिनांदधातिलोकान् बहुविधमपिचरतिप्रविशतिसुखमनुपगतेनिर
वद्यं २८ श्वानोभीषणकायाश्वपोसुरवानिवयांसिवल्लग्रध्रकुलपक्षिणांचसंघाः नरकदनेरुधिरपागुरुवचननुदम्
परतंविशंत्यसंतः २९ मर्यादानियताः स्वयंभुवायइहेमाः प्रभिनत्तिदशगुणासनोनुगत्वात् निवसतिहिनरः समसुखं
पितृविषयविपिनमवगाह्यसपापः ३० योलुब्धःसुदर्शंप्रियानृतस्वमनुष्यःसततनिकृतिवंचनाभिरतिः स्यात्
उपनिधिभिरसुखकृत्सपरमनिरयगो भृशमसुखमनुभवतिदुष्कृतकर्मा ३१ उष्णांवैतरणींमहानदीमवगाढोसिपा
त्रवनभिन्नगात्रः परशुवनशयोनिपतितोवसतिचमहारयेभृशार्त्तः ३२ ॥ ॥ ॥ ॥ ॥

दशगुणाःदशविधाः शौचसंतोषतपः स्वाध्यायेश्वरप्रणिधानानिपंचविधिरूपाः अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाख्यनिषेधरूपाश्चपंच। पितृविष राम०
यपमलोकविपिनमसीपत्रवनं।तेदेवतावगाह्यतत्रैववनिवसति ३० निकृतिः।नीचकर्मवंचनाचौर्यादि। उपनिधिस्थलेन ३२ ॥ ॥ ॥ ४७६

नरकादिदुःखैर्हि तुल्याः स्वर्गेपि नरकेष्वेतेत्याह महापदानीत्यादिना ब्रह्मादीनां स्थानानि इह लोकस्य सेवमोहमिति श्लाघसे परं तु ब्रह्मनो वेश्मसेन्द्रस्य कारिकां नरं ३३ अथा
यतां प्रचलत्तां मोक्षमार्गेण प्रख्यातं मां सुखस्य समाधिसंविधीयतां प्रयत्नतां ३४ अंतकाय च्छायति सुखायदारुणैः कृच्छ्रादितपोभिः ३५ यावत् जीवितहरणं न

महापदानिकरुषेसेन चाप्येवं वसेसेपरं चि[illegible]रस्य मत्तु कारिका मनागतां न बुध्यसे ३३ अथायतां किमास्येतेत्समुत्थितं महदश्रयं तत्र
तिप्रमाथिदारुणं सुखस्य संविधीयतां ३४ पुरा मतः प्रणीयते यमस्य राजशासनात् त्वमंतकाय दारुणैः प्रयत्नमात्रैवकुरु
३५ पुरा समूलवांधवं प्रभुर्हरत्यदुःखवित् न वेद जीवितं यमो न वास्ति तस्य वारकः ३६ पुरा भिवाति मारुतो यमस्य यः पुर
सरः पुरैकसवनीयसंकुरुष्व सांपराधिकं ३७ पुरा सहि हिक्कएवते प्रवाति मारुतांतकः पुराच विभ्रमंति ते दृशो महाभयागमे
स्मृतिश्च सर्वं संनिरुध्यते पुरा तवेह पुत्रक समाकुलस्य गच्छतः समाधिमुत्तमं कुरु ३८ शुभाशुभे पुराकृते प्रमाद कर्म विप्लुते स्म
रत्पुरा न तप्यसे निधान्य केवलं निधि ३९ पुरा शरीरमंतको भिनत्ति रोगसारथिः प्रसह्य जीवितक्षये तपो महत्समाचर ४०
पुरा हकाभयं करा मनुष्य देहगोचराः अभिद्रवंति सर्वतो यतस्व पुण्यपश्री[illegible]लिने ४१ ॥ ॥ ॥ ॥ ॥
उप उए फाले वरवि नजैरिकलति ते प[illegible]कंग भ्रूपहारि गी विधान्य केवलं निधिम् २४

जायते ततः प्रागेव सांपराधिकं परलोकहितं कुरुष्व तु तोरणसंवंधः ३६ वृकाः कामाद्याः ४२ ४२ ॥ ॥ ॥ ॥

हिरण्मयरथस्पर्शनेनमरणचिह्नं ४४ नेतांतवमतिंवा ४५ नद्दृंनविद्यां ४६ योनेकेविवाहार्थंधनंदायादाग्रात्स्यापाथेयमित्यर्थः ४७ पावकेघ्नतस्वेउष्मेश्मपवपि
ष्टविकारे।ग्रामस्वरत्वरपुत्रकृतपयास्मान्नयाप्रलीयसेत्रिपसे।भोगान्भुक्त्वामोक्षेयत्नंकरिष्यामीतिनमंतव्यंग्रप्राप्तस्वभोगेमृत्युभयमस्तीतिभावः ४९ साथिकेदेहे

पुरंधकारमेककोनुप्रपद्यसित्वरस्वैवे पुराहिरण्मयान्नगान्तिरीक्ष्यसेदिह्नेईति ४४ पुरस्कुसंगतानितेसुहृन्मुखाश्वपात्रवः वि
यालयंतिदर्शनात्नघरस्वपुत्रयस्तरं ४४ धनस्य पस्पराज्ञतोभयंनचास्तिचौरतः मृतंतवपत्नसुंचतिसमर्जयस्वतद्दृनं ४५
नतत्रसंविभज्यतेस्वकर्मभिः परस्परं यदेवयस्ययोनकतदेवतत्रसोश्नुते ४६ परत्रयेनजीव्यतेतदेवपुत्रदीयतां धनेपरस्य
रंधकंवसमर्जयस्वतत्स्वयं ४७ नयावदेवपच्यतेमहाजनस्यपावकं अपक्करवयावकेपुराप्रलीयसेत्वर ४८ नमातृपुत्र।
बांधवानसंस्कृतः प्रियोजनः अनुव्रजंतिसंकटेव्रजंतमेकपातिनं ४९ यदेवकर्मकेवलंपुराकृतंशुभाशुभं तदेवपुत्रसार्थि
कंभवत्यमुत्रगच्छतः ५० हिरण्यरत्नसंचयाः शुभाशुभेनसंचिताः नतस्यदेहसंक्षयेभवंतिकार्यसाधकाः ५१ परत्रगा
मिकस्यतेकृताकृतस्यकर्मणः नसाक्षिरात्मनासमोनृणामिहास्तिकश्चन ५२ ॥ ॥ ॥ ॥ ॥

द्वियादिसार्थवाहकं ५१ परत्रगामिकस्यगमनशीलस्यासाक्षित्वात्मनेतिद्वेकोऽस्ववेरीशाकल्पस्यङ्क्स्वस्वेतिप्रकृतिमोवेद्मस्वः साक्षित्वात्मनेतिपाठः प्रा
मादिकः मामन्योनजानातीतिमत्वापापंनकर्तव्यमितिभावः ५२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननु कर्त्तात्मनो ऽतिरिक्तस्य साक्षिणः सत्त्वे मानं किम् अत आह मनुष्येति अमुत्र साक्षिणि गच्छति लीयमानस्य कर्तुर्मनुष्यदेहस्य शून्यम् इव शून्यकं अभावो भवति । परदेहस्यासत्त्वादपि योगिदेहस्य मनुष्यदेहे होनं सो भवतीत्यर्थः अत्र विदृदृन्तु भवंप्रमाणयतिप्रविश्येति हार्दाकाशमिति शेषः ५३ साक्ष्यं तत्र गणाह देहेति

मनुष्यदेहशून्यकं भवत्यमुत्र गच्छतः प्रविश्य बुद्धिचक्षुर्भ्यां प्रदृश्यते हि सर्वशः ५३ देहाग्निर्भूयवायव्यः शरीरमाश्रिता लयः तएवतस्य साक्षिणो भवंति धर्मदर्शिनः ५४ अहर्निशेषु सर्वतः स्पृशन्तु सर्वचारिषु प्रकाशरदृष्टित्रिषु स्वधर्ममेव पा लय ५५ अनेकपारिपंथिके विरूपरौद्रमक्षिके स्वमेव कर्मरक्ष्यतां स्वकर्म तत्र गच्छति ५६ ततत्र संविभज्यते स्वक र्मणा परस्परं तथा कृतं स्वकर्मजं तदेव भुज्यते फलं ५७ यथाप्सरोगणाः फलं सुखं महर्षिभिः सह तथाप्नुवंति कर्मजं विमानकामगामिनः ५८ यथेह यत्कृतं शुभं विपाप्मभिः कृतात्मभिः तराप्नुवंतिमानवास्तथा विशुद्धयोनयः ॥ ५९ प्रजापतेः सलोकतां बृहस्पतेः शतक्रतोः व्रजंति ते परां गतिं गृहस्थधर्मसेतु भिः ६० सहस्रशोप्यनेकशः प्र वक्तुमुत्सहामहे अबुद्धिमोहनं पुनः प्रभुर्न नाम पावकः ६१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

५८ तत्र परलोकमार्गे विरूपाः रौद्राश्च मक्षिकाः दंशा यस्मिन् अनेकपारिपंथिनः शत्रवो लोहतुण्डाः पक्षिप्रकारा यस्मिन् ६० अबुद्धीन्मोहय तीति तथा पावकः पुनातीति पवित्रीकरोतीति प्रभुः स्वधर्मः स्त्रीवपाठे पावकः सत्कर्मा पावकमिति पाठे पि पावकमिव पापस्य परशो धर्म एव ६१ ॥

मो०
५७८

६० प्रमादतः प्रमादग्रहवासी अंतकः चमंत्वमतिभक्षयतीतिचमस् रिद्रियसेनानां ससुखांत्वंपत्नादिरोषणास्वस्वविषयभोगहीनांयावत्करोतितनतःपु
रेवगहीनंदेहंस्यजतित्कमेतितथायागहीनंदेहमा वेरोगत्वर्थः ६२ यथैवतिपुरः पश्चाश्चसर्वेषामात्ममात्रंपथ्याभवतितथागतिश्चात्मज्ञानरूपंत्वात्मनारे
हेनपरेणातत्संबंधिपुत्रादिना ६३ भयेषुउपस्थितेषुएकपातिनाएकाकिनायत्संपरायिकंपरलोकेहितंतमेवधर्मज्ञानंवानिधिमिवनिगूह्यनिधत्स्व

428

गत्वात्रिरष्टवर्षताक्रोवासिपंचविंशकः कुरुष्वधर्मसंचयंवयोहितेतिवर्त्तते ६१ पुराकरोतिसोंतकः प्रमादगोसुखांच
मूं यथाग्रहीतमुत्थितस्त्वस्वधर्मपालने ६२ यथात्वमेवपृष्ठतस्त्वमग्रतोगमिष्यसि तथागतिगमिष्यतः किमात्मना
परेणवा ६३ यदेकपातिनांसतांभवत्यमुत्रगच्छतां भयेषुसांपरायिकंनिधत्स्वकेवलंनिधिं ६४ सकूलमूलबांधवं
प्रभुर्हरत्ससंगवान् नसंतियस्यवारकाः पुरुष्वधर्मसंनिधिं ६५ इदंनिदर्शनंमयातवेहपुत्रसांप्रतं त्वदर्शनानुमान
तः प्रवर्णितंकुरुष्वतत् ६६ दधातियः स्वकर्मणाद्दातियस्यकस्यचित् स्वबुद्धिमोहजैर्गुणैः सएकएवयुज्यते
६७ ॥

केवलंमुख्यंनिष्कामंनिर्गुणं ६४ कूलंसंग्रन्नमाकूलेपुरमेष्वपविसेतिलिंगात् बालंदेहंदेवयस्रैः सहितंयथास्यात्तथेत्यर्थः ६६ यःस्वकर्मणाद्दधातिस्यात्मा
नंदेहंपुष्णाति यस्यकस्यचित्फलस्यकृतेरद्दातिचस्वबुद्धिरज्ञानंमोहोविपरीतज्ञानंतदुभयजैर्गुणैःदुःखादिभिःमुच्यतइतिपाठेस्वात्मानंचित्तंदक्षाति
एकस्मिन्नतिधारयतियस्तितयत्किंचिद्दातिसर्वंत्यजतीत्यर्थः ६१ ६७ ६७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम०
५७८

अङ्गं तत तमस्यादिवाक्यं तज्ज्ञानं करोति समस्तं ब्रह्माण्डं अश्नुते प्राप्नोति। यस्त्वेवं वेद अहं ब्रह्मास्मीति स इदं सर्वं भवतीति श्रुतेः। विदः सार्वात्म्यश्रुतेः। तेन तत सार्वात्म्यं
सार्वात्म्यं च अर्थस्य मोक्षाख्यपरमपुरुषार्थस्य दर्शनं। नान्यत् कृतं तत्कृतं तेन परिहृत्य अर्थसंहितं पुरुषार्थसंगतं भवति। ननु कृतघ्नो हि। सार्वात्म्यं सार्वात्म्यदार्ढ्यं

अङ्गं समस्तमश्नुते प्रकुर्वतः शुभाः क्रियाः। तदेतत्स्यादर्शनं कृतं तत्समर्थसंहितं ६८ निबध्नतीरज्जुरेषा या ग्रामे वसतो
रतिः छित्त्वैतां सुकृतो यान्ति नैनां छिन्दन्ति दुष्कृतः ६९ किं ते धनेन किं बन्धुभिस्ते किं ते पुत्रैः पुत्रक यो मरिष्यसि आत्मानम
न्विच्छ गुहां प्रविष्टं पितामहास्ते क्व गताश्च सर्वे ७० श्वः कार्यमद्य कुर्वीत पूर्वाह्ने चापराह्णिकं नहि प्रतीक्षते मृत्युः कृ
तं वास्य न वाकृतं ७१ अनुगम्य विनाशान्ते निवर्तन्ते ह बान्धवाः अग्नौ प्रक्षिप्य पुरुषं ज्ञातयः सुहृदस्तथा ७२ नास्तिका
न्निरनुक्रोशान्नरान्पापमतौ स्थितान् वामतः कुरु विस्रब्धं परं प्रेप्सुरतन्द्रितः ७३ एवमभ्याहते लोके कालेनोपनिपी
डिते सुमहद्धैर्यमालम्ब्य धर्मं सर्वात्मना कुरु ७४ अथेमं दर्शनोपायं सम्यक् यो वेत्ति मानवः सम्यक् स्वधर्मं कृत्वेह पर
त्र सुखमश्नुते ७५ न देहभेदे मरणं विजानतां न च प्रणाशः स्वनुपालिते पथि धर्मं हि यो वर्धयते स पण्डितो य एव धर्मा
च्च्यवते स मुह्यति ७६

विद्यावत्त्वमोहवद्दाहिकस्य सर्वः ७५ देहभेदेऽपि मरणं नास्तीति ज्ञेयं तत्त्वानुपालिते शिष्टैरादृते पथि वर्तमानानां ७६ ॥ ॥ ॥ ॥ ॥ ॥

मो०
५७९

५२८

७८ नोत्क्रामति धर्ममिति शेषः ७९ नोपहन्ति नैकधेति वक्तसमासः ८० ८१ ८२ ८३ ८४ ॥ ॥ ॥ ॥

प्रयुक्तयोः कर्मपथि स्वकर्मणोः फलं प्रयोक्ता लभते यथाकृतं निहीनकर्मा निरयं प्रपद्यते त्रिविष्टपं गाढमतिर्धर्मपारगः
७७ सोपानभूतं स्वर्गस्य मानुष्यं प्राप्य दुर्लभं तथात्मानं समादध्यात् भ्रश्यते न पुनर्यथा ७८ यस्य नोत्क्रामति मतिः
स्वर्गमार्गानुसारिणी तमाहुः पुण्यकर्माणमशोच्यं पुत्रबांधवैः ७९ यस्य नोपहता बुद्धिर्निश्चयेष्ववलंबते स्वर्गे कृता
तावकाशस्य नास्ति नरकमहद्भयं ८० तपोवनेषु ये जातास्तत्रैव निधनं गताः तेषामल्पतरो धर्मः कामभोगानजानतां
८१ यस्तु भोगान्परित्यज्य शरीरेण तपश्चरेत् न तेन किंचिन्न प्राप्तं तन्मे बहुमतं फलं ८२ मातापितृसहस्राणि पुत्र
दारशतानि च अनागतान्यतीतानि कस्य ते कस्य वा वयं ८३ अहमेको न मे कश्चिन्नाहमन्यस्य कस्यचित् न तं पश्या
मि यस्याहं तं न पश्यामि यो मम ८४ न तेषां भवता कार्यं न कार्यं तव तैरपि स्वकृतैस्तानि जातानि भवांश्चैव गमिष्यति ८५
इह लोके हि धनिनां स्वजनः स्वजनायते स्वजनस्तु दरिद्राणां जीवतामपि नश्यति ८६ संचिनोत्यशुभं कर्म कलत्रापेक्षया
नरः ततः क्लेशमवाप्नोति परत्रेह तथैव च ८७ पश्य तिष्ठन्ति भूतं हि जीवलोकं स्वकर्मणा तत्कुरुष्व तथा पुत्र कृत्स्नं यत्स
मुदाहृतं ८८ ॥ ॥ ॥ ॥

राम०
५७९

२१ मोक्षसैरीकं मोक्षोपदेशार्थं यावकस्य धर्मस्य यावकस्येति पाठेऽपि स एवार्थः पावकाध्ययनं चित्तशोधकाध्ययनं नाम २२ शान्तिपर्वणि पंचचत्वारिंशः समाप्तोऽयम्

नदेतत्संप्रदृश्यैव कर्मभूमिं प्रपश्यता शुभान्याचरितव्यानि परलोकमभीप्सता १९ मासर्तुसंज्ञापरिवर्तकेन सूर्याग्निना रात्रिदि
वेंधनेन स्वकर्मनिष्ठाफलसाक्षिकेन भूतानि कालः पचति प्रसह्य २० धनेन किं यन्न ददाति नाश्नुते बलेन किं येन रिपुं न बाध
ते श्रुतेन किं येन न धर्ममाचरेत् किमात्मना यो न जितेंद्रियो वशी २१ भीष्म उवाच इदं द्वैपायनवचो हितमुक्तं निशम्य तु शुको
गतः परित्यज्य पितरं मोक्षदैशिकं २२ शांतौ मोक्षधर्मेषु पावकाध्यायनं नाम युधिष्ठिर उवाच यद्यस्ति दत्तमिष्टं वा तपस्तप्तं त
थैव च गुरूणां वापि शुश्रूषा तन्मे ब्रूहि पितामह १ भीष्म उवाच आत्मनानर्थयुक्तेन पापे निविशते मनः स कर्म कलुषं कृत्वा
क्लेशे महति धीयते २ दुर्भिक्षादेव दुर्भिक्षं क्लेशात्क्लेशं भयाद्भयं मृतेभ्यः प्रमृता यांति दरिद्राः पापकर्मिणः ३ उत्सवा
दुत्सवं यांति स्वर्गात्स्वर्गं सुखात्सुखं श्रद्दधानाश्च दांताश्च धनस्थाः शुभकारिणः ४ व्यालकुंजरदुर्गेषु सर्पचोरभयेषु च
हस्तावापेन गच्छंति नास्तिकाः किमतः परं ५ प्रियदेवातिथेयाश्च वदान्याः प्रियसाधवः क्षेम्यमात्मवतां मार्गमास्थिता ह
स्तदक्षिणाः ६ ॥ ॥

गिवेणापेहत्यधर्मानुष्ठानादन्तेरस्यां वैयर्थ्यमाशंक्य तेषामपि सदसत्फलत्वमनिवार्यमित्याह । यद्यस्तीत्यादिना १ ग्राम्याख्यानोयमध्यायः ॥ ॥ ॥

मो०
४२०

४८०

पुलकाइवधान्येषुपूत्तिंकाइवपक्षिषु तद्विधास्तेमनुष्येषु येषांधर्मोनकारणं ७ सुशीघ्रमपिधावंतंविधानमनुधावति शेतेसहशयाने
नयेनयेनयथाकृतं ८ पार्श्वंतिष्ठतितिष्ठंतंधावंतमनुधावति करोतिकुर्वतःकर्मछायेवानुविधीयते ९ येनयेनयथायद्यत्पुराकर्मसुनि
श्चितं तत्तदेवांतरंभुंक्तेनित्यंविहितमात्मना १० समानकर्मविक्षेपविधानपरिरक्षणं मृत्युग्राममिमंकालःसमंतादपकर्षति ११ अचो
द्यमानानियथापुष्पाणिचफलानिच स्वकालंनातिवर्तंतेतथाकर्मपुराकृतं १२ संमानश्चापमानश्चलाभोलाभःक्षयाव्ययौ प्रवृत्ता
नि वर्तंतेनिधनांतापरेपदे १३ आत्मनाविहितंदुःखमात्मनाविहितंसुखं गर्भशय्यामुपादायभजतेपूर्वदैहिकं १४ वालोयुवावा
वृद्धश्चयत्करोतिशुभाशुभं तस्यांतस्यामवस्थायांभुंक्तेजन्मनिजन्मनि १५ यथाधेनुसहस्रेषुवत्सोविंदतिमातरं तथापूर्वकृतंकर्मकर्त्ता
रमनुगच्छति १६ मलिनंहियथावस्त्रंपश्चाछुद्ध्यतिवारिणा उपवासैःप्रतप्तानांदीर्घंसुखमनंतकं १७ दीर्घकालेनतपसासेवितेनम
हात्मने धर्मनिर्धूतपापानांसंसिध्यंतिमनोरथाः १८ शकुनानामिवाकाशेमत्स्यानामिवचोदके पदंयथानदृश्येततथापुण्यकृतांगतिः
१९ ॥ ॥

राम०
४२०

नि
२० शांतौपरिसद्वत्वारिंशः शुकनामिवाकाश इतिवक्ष्यनिष्ठानंनिष्कलं संस्कृत्वा सन्यासमहितवृत्त्यष्ठावानशुकः सन्निपथमवतीर्णास्तदीयेनैवमार्गे

अलमन्यैरुपालंभैः कीर्तितैर्व्यतिक्रमैः पेशलंचानुरूपंचकर्त्तव्यंहितमात्मनः २० शांतौमोक्षधर्मेषुकालमुनिकंना
म युधिष्ठिरउवाच कथंव्यासस्यधर्मात्माशुकोजज्ञेमहातपाः सिद्धिंचपरमांप्राप्तस्तन्मेब्रूहिपितामह १ कस्यांचोत्पा
दयामासशुकंव्यासस्तपोधनः नह्यस्यजननींविद्मजन्मचाग्र्यंमहात्मनः २ कथंचबालस्यसतःसूक्ष्मज्ञानेगतामतिः यथा
नान्यस्यलोकेस्मिन्द्वितीयस्येहकस्यचित् ३ एतदिच्छाम्यहंश्रोतुंविस्तरेणमहामते नहिमे तृप्तिरस्तीहशृण्वतोमृतमुत्त
मं ४ माहात्म्यमात्मयोगंचविज्ञानंचशुकस्यह यथावदानुपूर्व्येणतन्मेब्रूहिपितामह ५ भीष्मउवाच नहायनैर्नप
लितैर्नवित्तैर्नचबंधुभिः ऋषयश्चक्रिरेधर्मंयोनूचानःसनोमहान् ६ तपोमूलमिदंसर्वंयन्मांपृच्छसिपांडव तदिं
द्रियाणिसंयम्यतपोभवतिनान्यथा ७ इंद्रियाणांप्रसंगेनदोषमृच्छत्यसंशयं संनियम्यतुतान्येवसिद्धिमाप्नोतिमानव
: ८ अश्वमेधसहस्रस्यवाजपेयशतस्यच योगस्यकलयातातनतुल्यंविद्यतेफलं ९ अत्रतेवर्त्तयिष्यामिजन्मयोगफ
लंतथा शुकस्याग्र्यांगतिंचैवदुर्विदामकृतात्मभिः मेरुशृंगेकिलपुराकर्णिकारवनायुते विजहारमहादेवोभीमैर्भू
तगणैर्वृतः ११ ॥

गंहस्तातत्त्वःसमितिमन्वानस्यजन्मादिकंसर्वंपृच्छतिकथंव्यासस्यधर्मात्मेत्यादि १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

१२ योगेनात्मानमाविश्य अंतर्हृदयेइंद्रियाणिनिरुध्यसर्वः १३ १४ १५ २० २१ २३ २५ ॥ ॥ ॥ ॥ ॥

मो०
४८१

481

शैलराजसुतांचैवदेवीतत्राभवत्पुरा तत्रदिव्यंतपस्तेपेकृष्णद्वैपायनस्तदा ११ योगेनात्मानमाविश्ययोगधर्मपरायणः धा
रयन्सतपस्तेपेपुत्रार्थेकुरुसत्तम १२ अग्नेर्भूमेरपांवायोरंतरिक्षस्यचाविभो धैर्येणसंमितः पुत्रोममभूयादितिस्मह १४
संकल्पेनाथयोगेनदुःप्रापमकृतात्मभिः वरयामासदेवेशमास्थितस्तपउत्तमं १५ अनिलाम्बुभुजाहारः शतंकिलसमाःप्र
भुः आराधयन्महादेवंबहुरूपमुमापतिं १६ तत्रब्रह्मर्षयःसर्वेसर्वेराजर्षयस्तथा लोकपालाश्चलोकेशंसाध्याश्चवसुभिः
सह १७ आदित्याश्चैवरुद्राश्चदिवाकरनिशाकरौ वसवोमरुतश्चैवसागराः सरितस्तथा १८ अश्विनौदेवगंधर्वास्तथा
नारदपर्वतौ विश्वावसुश्चगंधर्वः सिद्धाश्चाप्सरसस्तथा १९ तत्ररुद्रोमहादेवः कर्णिकारमयींशुभां धारयानः स्रजंभा
तिज्योत्स्नामिवनिशाकरः २० तस्मिन्दिव्येवनेरम्येदेवदेवर्षिसंकुले आस्थितः परमंयोगमृषिःपुत्रार्थमच्युतः २१
नचास्यहीयतेप्राणोनग्लानिरुपजायते त्रयाणामपिलोकानांतदद्भुतमिवाभवत् २२ जटाश्चतेजसातस्यवैश्वानर
शिखोपमाः प्रज्वलंत्यःस्मदृश्यंतेयुक्तस्यामिततेजसः २३ मार्कंडेयोहिभगवानेतदाख्यातवान्मम सदेवचरितानी
हकथयामाससेमसदा २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

एम०
४८१

कृष्णस्य व्यासस्य २८ तद्भावभावीति ब्रह्मभावं ब्रह्माहमिति भावं आत्मानं भावयतीति तद्भावभावी तद्दृष्टिरिति वा एतस्य महतो ब्रह्मणस्य नाम भवतीति तच्छब्दस्य ब्रह्मनामधेयत्वा
त्तेन केवलं भावनामात्रमुक्तं अपितु तद्बुद्धिः तेनैव बुद्धिर्निश्चयो यस्य सोपि तेन अद्वयानुच्यते तदेवात्मा चित्तं यस्य सोपि तदाश्रयः तदपाश्रय इति तत्र स्थैर्यं दर्शनेनैव तदर्थमुच्यते २९

एतादृश्यपि कृष्णस्य तपसा तेन दीपिताः अग्निवर्णा जटा जाताः प्रकाशन्ते महात्मनः २५ एवंविधेन तपसा तस्य भक्त्या च भारत म
हेश्वरः प्रसन्नात्मा चकार मनसा मतिं २६ उवाच चैवं भगवांस्त्र्यम्बकः प्रहसन्निव एवंविधस्ते तनयो द्वैपायन भविष्यति २७ य
थाह्यग्निर्यथा वायुर्यथा भूमिर्यथा जलं यथा च खं तथा शुद्धो भविता ते सुतो महान् २८ तद्भावभावी तद्बुद्धिस्तदात्मा तदपाश्रयः
तेजसावृत्य लोकांस्त्रीन्यशः प्राप्स्यति ते सुतः २९ शांतौ मोक्षधर्मे शुकोत्पत्तौ भीष्म उवाच स लब्ध्वा परमं देवाद्वरं सत्यवतीसु
तः अरणीं सहिते गृह्य ममन्थाग्निचिकीर्षया १ अथ रूपं परं राजन् बिभ्रतीं स्वेन तेजसा घृताचीं नामाप्सरसमपश्यद्भ
गवानृषिः २ ऋषिरप्सरसं दृष्ट्वा सहसा काममोहितः अभवद्भगवान्व्यासो वने तस्मिन्युधिष्ठिर ३ सा च दृष्ट्वा तदा
व्यासं कामसंविग्नमानसं शुकी भूत्वा महाराज घृताची समुपागमत् ४ स तामप्सरसं दृष्ट्वा रूपेणान्येन संवृतां शरी
रजेनानुगतः सर्वगात्रातिगेन ह ५ ॥

मा तापरिसप्तचत्वारिंशोध्यायः अरणीं द्वे अधरोत्तरे सहिते मिथुनरूपे १ २ ३ ४ ५ ॥ ॥ ॥

८ शुक्रेनिर्मथ्यमानेज्ञातत्वात्शुकइतिरेफलोपेनास्यनामकृतं १० महात्मामहादेवः उपानयत्स्वशिष्यंकृतवान् १८ ॥ ॥ ॥ ॥

सतुधैर्येणमहतानिगृह्यहृच्छयंमुनिः नशशाकनियंतुंतत्व्यासः प्रविसृतंमनः ६ भावित्वाच्चैवभावस्यघृताच्यावपुषाहृतः
यत्नान्नियच्छतस्तस्यमुनेरग्निचिकीर्षया ७ अरण्यामेवसहसातस्यशुक्रमवापतत् सोविशंकेनमनसातथैवद्विजसत्तमः ८
अरणींममंथब्रह्मर्षिस्तस्यांजज्ञेशुकोनृप शुक्रेनिर्मथ्यमानेसशुकोजज्ञेमहातपाः ९ परमर्षिर्महायोगीअरणीगर्भसंभवः
यथाध्वरेसमिद्धोग्निर्भातिहव्यमुदावहन् १० तथारूपःशुकोजज्ञेप्रज्वलन्निवतेजसा विभ्रत्पितुश्चकौरव्यरूपवर्णमनुत्तमं
११ बभौतदाभावितात्माविधूमइवपावकः तंगंगासरितांश्रेष्ठामेरुपृष्ठेजनेश्वर १२ स्वरूपिणीतदाभ्येत्यस्नापयामासवारि
णा अंतरिक्षाच्चकौरव्यदंडःकृष्णाजिनंचह १३ पपातभूमिराजेन्द्रशुकस्यार्थेमहात्मनः जेगीयंतेस्मगंधर्वाननृतुश्चाप्सरो
गणाः १४ देवदुंदुभयश्चैवप्रावाद्यंतमहास्वनाः विश्वावसुश्चगंधर्वस्तथातुंबुरुनारदौ १५ हाहाहूहूश्चगंधर्वौतुष्टुवुः
शुकसंभवं तत्रशक्रपुरोगाश्चलोकपालाःसमागताः १६ देवादेवर्षयश्चैवतथाब्रह्मर्षयोपिच दिव्यानिसर्वपुष्पाणि
प्रववर्षचमारुतः १७ जंगमाजंगमंचैवप्रहृष्टमभवज्जगत् तंमहात्मास्वयंप्रीत्यादेव्यासहमहाद्युतिः १८ ॥ ॥

२१ ईश्वरप्रसादात्त्वयं मातर्वेदेपिशिष्टाचारपालनार्थेबृहस्पतिंगुरुंचकारेत्याह बृहस्पतिमिति २७ सप्तोपरिशिष्टाचत्वारिंशत् मोक्षंमोक्षशास्त्रं अनुचिंत्यउपादेय

जातमात्रंमुनेःपुत्रंविधिनोपानयत्तदा तस्मैदेवेश्वरःशक्रोदिव्यमद्भुतदर्शनं १९ ददौकमंडलुंप्रीत्यादेववासांसिवाविभो हंसाश्च
शतपत्राश्चसारसाश्चसहस्रशः २० प्रदक्षिणमवर्तंतशुकाश्चाषाश्चभारत आरणेयस्ततोदिव्यंप्राप्यजन्ममहाद्युतिः २१ तत्रै
वोवासमेधावीब्रह्मचारीसमाहितः उत्पन्नमात्रंतंवेदाःसरहस्याःससंग्रहाः २२ उपतस्थुर्महाराजयथास्यपितरंतथा बृहस्प
२६४ तिंचवव्रेसवेदांगभाष्यवित् २३ उपाध्यायंमहाराजधर्ममेवानुचिंतयन् सोधीत्यनिखिलान्वेदान्सरहस्यान्ससंग्रहान् २४ इति
हासंचकार्त्स्न्येनराजशास्त्राणिचाविभो गुरवेदक्षिणांदत्वासमावृत्तोमहामुनिः २५ उग्रंतपःसमारेभेब्रह्मचारीसमाहि
तः देवतानामृषीणांचबाल्येपिसमहातपाः २६ संमंत्रणीयोमान्यश्चज्ञानेनतपसातथा नतस्यारमतेबुद्धिराश्रमेषु
नराधिप त्रिषुगार्हस्थ्यमूलेषुमोक्षधर्मानुदर्शिनः २७ शांतिमोक्षधर्मेषुशुकोत्पत्तौ भीष्मउवाच समोक्षमनुचिंत्यैवशु
कःपितरमभ्यगात् प्राहाभिवाद्यचगुरुंश्रेयोर्थीविनयान्वितः १ मोक्षधर्मेषुकुशलोभगवान्प्रब्रवीतुमे यथामेमनसः
शांतिःपरमासंभवेत्प्रभो २ श्रुत्वापुत्रस्यतुवचःपरमर्षिरुवाचतं अधीष्वपुत्रमोक्षंवैधर्मांश्चविविधानपि ३ ॥

वेनज्ञाता १ २ ३ ४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मो०
४८३
483

५ उवाचेति जनकं प्रति मिथिलां मति संवादार्थी न तत्त्वज्ञानायनयार्थे मोक्षार्थं मोक्षशास्त्रार्थे १३ मेरोर्वर्षमिलावृतं हरेर्वर्षं हे रवर्षाख्यं हैमवतं वर्षं किंपुरुषाख्यं १४ १५

सू ५

पितुर्नियोगाज्जग्राह शुको धर्मभृतां वरः योगशास्त्रं च निखिलं कापिलं चैव भारत ४ स तं ब्राह्म्या श्रिया युक्तं ब्रह्मतुल्यपराक्रमं
मेने पुत्रं यदा व्यासो मोक्षधर्मविशारदं ५ उवाच गच्छेति तदा जनकं मिथिलेश्वरं स ते वक्ष्यति मोक्षार्थं निखिलं मिथिलेश्व
रः ६ पितुर्नियोगमादाय जगाम मिथिलां नृप प्रष्टुं धर्मस्य निष्ठां वै मोक्षस्य च परायणं ७ उक्तश्च मानुषेण त्वं पथा गच्छे
त्यविस्मितः न प्रभावेन गन्तव्यमन्तरिक्षचरेण वै ८ आर्जवेणैव गन्तव्यं न सुखान्वेषिणा तथा नान्वेष्टव्या विशेषा हि विशे
षा हि प्रसंगिनः ९ अहंकारो न कर्त्तव्यो याज्ये तस्मिन्नराधिपे स्थातव्यं च वशे तस्य स ते छेत्स्यति संशयं १० स धर्मकुशलो रा
जा मोक्षशास्त्रविशारदः ११ याज्यो मम स यद्ब्रूयात्तत्कार्यमविशंकया एवमुक्तः स धर्मात्मा जगाम मिथिलां मुनिः पद्भ्यां श
क्तोन्तरिक्षेणाक्रांतुं पृथ्वीं ससागरां १२ स गिरींश्चाप्यतिक्रम्य नदीस्तीर्थसरांसि च बहुव्यालमृगाकीर्णा अटवीश्च वना
नि च १३ मेरोर्हरेश्च द्वे वर्षे वर्षं हैमवतं ततः क्रमेणैव व्यतिक्रम्य भारतं वर्षमासदत् १४ स देशान्विविधान्पश्यंश्चीन
हूणनिषेवितान् आर्यावर्त्तमिमं देशमाजगाम महामुनिः १५ ॥ ॥ ॥ ॥

एम०
४८३

१६ पश्यन्नपि न पश्यति तुष्टः स्वनिश्चयात् वैराग्यात् २३ तं भारं जिज्ञासार्थं अर्थं मोक्षं २४ तस्या द्वारमित्यादिना त्र्यायशेषेण रागस्य क्रोधकामतयोर्बाध्यते २५ २८

पितुर्वचनमाज्ञाय तमेवार्थं विचिंतयन् अध्वानं सोतिचक्राम खेचरः खेचरन्निव १६ पत्तनानि च रम्याणि स्फीतानि नगराणि च रत्ना
नि च विचित्राणि पश्यन्नपि न पश्यति १७ उद्यानानि च रम्याणि तथैवायतनानि च पुण्यानि चैव रत्नानि सोत्यक्रामद्यथाध्वगः १८
सोचिरेणैव कालेन विदेहानाससाद ह रक्षितान् धर्मराजेन जनकेन महात्मना १९ तत्र ग्रामान् बहून् पश्यन् बहून्नरसभोजनान् प
ल्लीघोषान्समृद्धांश्च बहुगोकुलसंकुलान् २० स्फीतांश्च शालियवैर्हंससारससेवितान् पद्मिनीभिश्च शतशः श्रीमतीभिरलं
कृतान् २१ स विदेहानतिक्रम्य समृद्धजनसेवितान् मिथिलोपवनं रम्यमाससाद समृद्धिमत् २२ हस्त्यश्वरथसंकीर्णं नरनारी
समाकुलं पश्यन्नपश्यन्निव तत् समतिक्रामदच्युतः २३ मनसा तं वहन् भारं तमेवार्थं विचिंतयन् आत्मारामः प्रसन्नात्मा मि
थिलामाससाद ह २४ तस्या द्वारं समासाद्य निःशंकः प्रविवेश ह तत्रापि द्वारपालास्तमुग्रवाचा न्यषेधयन् २५ तथैव च शु
कस्तत्र निर्ममः समतिष्ठत न चातपाध्वसंतप्तः क्षुत्पिपासाश्रमान्वितः २६ प्रताप्यति ग्लायति वा नापैति च तथातपात् तेषां
तु द्वारपालानामेकः शोकसमन्वितः २७ मध्यंगतमिवादित्यं दृष्ट्वा शुकमवस्थितं पूजयित्वा यथान्यायमभिवाद्य कृतांजलिः २८

॥ ॥ ॥ ॥ ॥ ॥ ॥

मो० ४८४ 484

प्रावेशयत्ततः कक्ष्यांद्वितीयांराजवेश्मनः तत्रासीनः शुकस्तातमोक्षमेवान्वचिंतयत् २९ छायायामातपेचैवसमदर्शीसमद्युतिः तंमु
हूर्त्तादिवागम्यराज्ञोमंत्रीकृतांजलिः ३० प्रावेशयत्ततः कक्ष्यांद्वितीयांराजवेश्मनः तत्रांतः पुरसंबद्धंमहच्चैत्ररथोपमं ३१ सुविभक्तजला
क्रीडंरम्यंपुष्पितपादपं शुकंप्रवेशयन्मंत्रीप्रमदावनमुत्तमं ३२ सतस्यासनमादिश्यनिश्चक्रामततः पुनः तंचारुवेषाः सुश्रोण्यस्त
रुण्यः प्रियदर्शनाः ३३ सूक्ष्मरक्तांबरधरास्तप्तकांचनभूषणाः संलापोल्लापकुशलानृत्तगीतविशारदाः ३४ स्मितपूर्वाभिभाषिण्यो
रूपेणाप्सरसांसमाः कामोपचारकुशलाभावज्ञाः सर्वकोविदाः ३५ परंपंचाशतंनार्योवारमुख्याः समाद्रवन् पाद्यादीनिप्रतिग्राह्य
पूजयापरयार्चयन् ३६ कालोपपन्नेनतदास्वाद्वन्नेनाभ्यतर्पयन् तस्यभुक्तवतस्तात तदंतः पुरकाननं ३७ सुरम्यंदर्शयामासुरे
कैकश्येनभारत क्रीडंत्यश्चहसंत्यश्चगायंत्यश्चापिताः शुभं ३८ उदारसत्वंसत्वज्ञाः स्त्रियः पर्यचरंस्तथा आरणेयस्तुशुद्धात्मा
निःसंदेहः स्वकर्मकृत् ३९ वश्येंद्रियोजितक्रोधोनहृष्यति तस्मैशय्यासनंदिव्यंदेवार्हंरत्नभूषितं ४० स्पर्द्ध्यास्तरणसंकीर्णंद
दुस्ताः परमस्त्रियः पादशौचंतुकृत्वैवशुकः संध्यामुपास्यच ४१ ॥ ॥ ॥ ॥ ॥ ॥ शां० ४८४

नकुप्यति २

आरोपः।अरणिजःशुकः ४५ कार्ष्णिःशुकःअच्युतःधैर्यादिगतिशोभः ४६ अध्यायःसमाप्ति १ २ ३ ४ ५ ६ ७ ८ ९

निषसादासनेपुण्येतमेवार्थंविचिंतयन् शर्वरींतत्रतत्रासौसंध्याध्यानपरायणः ४२ मध्यरात्रेयथान्यायंनिद्रामाहारयत्प्रभुः त
तोमुहूर्तादुत्थायकृत्वाशौचमनंतरं ४३ स्त्रीभिःपरिवृतोधीमान्ध्यानमेवान्वपद्यत अनेनविधिनाकार्ष्णिस्तदहःशेषमच्युतः
तांचरात्रिंनृपकुलेवर्त्तयामासभारत ४४ शांतौमोक्षधर्मेषुशुकोत्पत्तौ भीष्मउवाच ततःसराजाजनकोमंत्रिभिःसहभारत
पुरःपुरोहितंकृत्वासर्वाण्यंतःपुराणिच १ आसनंचपुरस्कृत्यरत्नानिविविधानिच शिरसाचार्घ्यमादायगुरुपुत्रंसमभ्यगात् २
सतदासनमादायबहुरत्नविभूषितं स्पर्ध्यास्तरणसंस्तीर्णंसर्वतोभद्रमृद्धिमत् ३ पुरोधसासंगृहीतंहस्तेनालभ्यपार्थिवः
प्रददौगुरुपुत्रायशुकायपरमार्चितं ४ तत्रोपविष्टंतंकार्ष्णिंशास्त्रतःप्रत्यपूजयत् पाद्यंनिवेद्यप्रथममर्घ्यंगांचन्यवेदयत् ५
सचतांमंत्रवत्पूजांप्रत्यगृह्णाद्यथाविधि प्रतिगृह्यतुतांपूजांजनकाद्द्विजसत्तमः ६ गांचैवसमनुज्ञायराजानमनुमान्यच पर्य
पृच्छन्महातेजाराज्ञःकुशलमव्ययं ७ अनामयंचराजेंद्रशुकःसानुचरस्यह अनुशिष्टस्तुतेनासौनिषसादसहानुगः
८ उदारसत्वाभिजनोभृशंसोराजाकृतांजलिः कुशलंचाव्ययंचैवपृष्ट्वावैयासकिंनृपः ९ ॥ ॥ ॥ ॥ ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मो०
४२५

485

१२ यत्कार्यमित्यादिना ब्रतीभूत्वा गृहीभवेद्गृहीभूत्वा वनीभवेद्वनीभूत्वा प्रव्रजेदिति क्रमसमुच्चयपक्षोऽभिहितः १८ वीतरागात्मा विरक्तचित्तः । ब्रह्माश्रमः

किमागमनमित्येव पर्यपृच्छत पार्थिवः ९ शुक उवाच पित्राहमुक्तो भद्रं ते मोक्षधर्मार्थकोविदः विदेहराजो याज्यो मे जनको ना
म विश्रुतः १० तत्र गच्छस्व वै तूर्णं यत्ते हृदि संशयः प्रवृत्तौ वा निवृत्तौ वा स ते छेत्स्यति संशयं ११ सोऽहं पितुर्नियोगात्त्वामुपप्रष्टु
मिहागतः तन्मे धर्मभृतां श्रेष्ठ यथावद्वक्तुमर्हसि १२ किं कार्यं ब्राह्मणेनेह मोक्षार्थश्च किमात्मकः कथं च मोक्षः प्राप्तव्यो ज्ञा
नेन तपसाथवा १३ जनक उवाच यत्कार्यं ब्राह्मणेनेह जन्मप्रभृति तच्छृणु कृतोपनयनस्तात भवेद्वेदपरायणः १४ तपसा
गुरुवृत्त्या च ब्रह्मचर्येण वा विभो देवतानां पितॄणां चाप्यनृणश्चानसूयकः १५ वेदानधीत्य नियतो दक्षिणामपवर्ज्य च
अभ्यनुज्ञामथ प्राप्य समावर्तेत वै द्विजः १६ समावृत्तश्च गार्हस्थ्ये स्वदारनियतो वसेत् अनसूयुर्यथान्यायमाहिताग्निस्त
थैव च १७ उत्पाद्य पुत्रपौत्रं तु वन्याश्रमपदे वसेत् तानेवाग्नीन्यथाशास्त्रमर्चयन्नतिथिप्रियः १८ स वनेऽग्नीन्यथान्याय।
मात्मन्यारोप्य धर्मवित् निर्द्वन्द्वो वीतरागात्मा ब्रह्माश्रमपदे वसेत् १९ ॥ ॥ ॥ ॥ ॥ ॥

सन्यासाश्रमाः तत्रैव परं पदस्थानं तत्र १९ १९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम०
४२५

एतदाक्षिपति। उत्पन्न इति। ज्ञानं शास्त्रजा धीः विज्ञानमनुभवः तस्मिन्मोक्षाश्रमे फले ब्रह्मचर्याश्रम एव उत्पन्ने सति त्रिषु ब्रह्मचर्यादिषु। समुच्चयपक्षे पर्यवसितः तर्ह्याब्रह्म
चर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा यदहरेव विरजेत्तदहरेव प्रव्रजेदिति नियमः का निर्बोध्येति भावः २० तत्र ब्रह्मचर्यस्यावश्यकत्वं नावबुद्धाहं न विनेति २१ त्वमपि तावत्कर्ण
धारः ज्ञानं शास्त्रं तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं इति श्रुतेः केवलमनिरूपणेयाशोकात्मेनैव तु ज्ञानायमेवेत्यादिश्रुतिभिरन्वयव्यति

श्रीशुक उवाच उत्पन्ने ज्ञानविज्ञाने नैष्ठिके हृदि शाश्वते किमवश्यं निवस्तव्यमाश्रमेषु भवेषु वा २० एतद्भवंतं पृछामि तद्भवान्वक्तु
मर्हति यथा वेदार्थतत्वेन ब्रूहि मे त्वं जनाधिप २१ जनक उवाच न विना ज्ञानविज्ञाने मोक्षस्याधिगमो भवेत् न विना गुरुसंबंधं ज्ञा
नस्याधिगमः स्मृतः २२ गुरुः प्लावयिता तस्य ज्ञानं प्लव इहोच्यते विज्ञाय कृतकृत्यस्तु तीर्णस्तदुभयं त्यजेत् २३ अनुछेदाय
लोकानामनुछेदाय कर्मणां पूर्वैराचरितो धर्मश्चातुराश्रम्यसंकरः २४ अनेन क्रमयोगेन बहुजातिषु कर्मणां हित्वा शु
भाशुभं कर्म मोक्षो नामेह लभ्यते २५ भावितैः करणैश्चायं बहुसंसारयोनिषु आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे
२६

रेकाग्र्यं चाचार्यकरणस्य विद्याहेतुत्वावगमात्तदावश्यकमिति भावः ननूभयं आचार्यशास्त्रे २३ वामदेववत् ब्रह्मचर्येऽपि ज्ञाने जाते सति किं तेनेत्याशंक्याह
अनुछेदायेति। लोकशिक्षार्थमपि तदावश्यकमिति भावः २४ जातिषु जन्मसु २५ भावितैः शोधितैः करणैः बुद्ध्यादिभिः २६ ॥ । । ॥

तमिति त्रिचित्तमुद्दिश्यर्थमाश्रमाश्रमधर्माः तद्बुद्धौ तु तेष्वर्थो ऽस्त्यर्थः २८ सर्वभूतेष्वनुगतमात्मानं संप्रज्ञानेपश्यपेन पश्यति सर्वभूतानि चात्मनि रज्जूरगवत् विलीनानि च्यस्य
प्रज्ञाने पश्यति। वारिचरो हंसादिः २९ प्लवनात् निम्नात् यथाम्बुचरः पर्वतात्पर्वतं गच्छन्निम्नं देशमननुसृत्य गच्छति नैवं पक्षी तद्वद्विहाय देहं नानुसरतीत्यर्थः ३१ ज्योतिः चि

तमाश्रमाद्यत्तमुक्तस्य दृष्टार्थस्य विपश्चितः त्रिष्वाश्रमेषु को न्वर्थो भवेत्परममीप्सतः २७ एजसांख्यामसांख्यैव निसंदेहाविवर्जे
येत् सात्त्विकं मार्गमास्थाय पश्येदात्मानमात्मना २८ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि संपश्यन्नोपलिप्येत जले वारिच
रो यथा २९ पक्षिवत्प्लवनाद्ध्वमुत्रानन्त्यमश्नुते विहाय देहान्निर्मुक्तो निर्द्वंद्वः प्रशमं गतः ३० अत्र गाथाः पुरा गीताः म
हाराज्ञा ययातिना धार्यंते या द्विजैस्तात मोक्षशास्त्रविशारदैः ३१ ज्योतिरात्मनि नान्यत्र सर्वजंतुषु तत्समं स्वयं च शक्यते द्रष्टुं सु
समाहितचेतसा ३२ न बिभेति परो यस्मान्न बिभेति पराच्च यः यश्च नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ३३ यदा भावं न कुरु
ते सर्वभूतेषु पापकं कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ३४ संयोज्य मनसात्मानमीर्ष्यामुत्सृज्य मोहिनीं त्यक्त्वा कामं
च मोहं च तदा ब्रह्मत्वमश्नुते ३५ यदा श्राव्ये च दृश्ये च सर्वभूतेषु चाप्ययं समो भवति निर्द्वंद्वो ब्रह्म संपद्यते तदा ३६ यदा स्तु
तिं च निंदां च समत्वेनैव पश्यति कांचनं चायसं चैव सुखदुःखे तथैव च ३७ ॥ ॥ ॥ ॥ ॥

न्यात्र ब्रह्म आत्मनि बुद्धौ। समं एकं। एकत्वेनानुभवत्स्वमात्मानमित्याह स्वयमिति। सुष्ठु समाहितं योगारूढं चेतो यस्य तेन ३२ दर्शनलिंगमाह न बिभेतीत्यादिना ३३
३४ ३५ ३६ ३७

३९ तमःपरिगतंचांधकारमात्मज्ञानव्याप्तंचावेश्मगृहंसर्वोक्षिणांब्रह्मच ४० ४१ ४९ ५०

शीतमुष्णंतथैवार्थमनर्थंप्रियमप्रियं जीवितंमरणंचैवब्रह्मसंपद्यतेनरः ३८ प्रसार्येहयथांगानिकूर्मःसंहरतेपुनः तथेंद्रि।
याणिमनसासंयंतव्यानिभिक्षुणा ३९ तमःपरिगतंवेश्मयथादीपेनदृश्यते तथाबुद्धिप्रदीपेनशक्यआत्मानिरीक्षितुं ४०
एतत्सर्वंचपश्यामित्वयिबुद्धिमतांवर यच्चान्यदपिवेत्तव्यंतत्त्वतोवेदतद्भवान् ४१ ब्रह्मर्षेविदितश्चासिविषयांतमुपागतः गु
रोस्तवप्रसादेनतववैचैवोपशिक्षया ४२ तस्यैवचप्रसादेनप्रादुर्भूतंमहामुने ज्ञानंदिव्यंमयापीदंतेनास्मिविदितोमम ४३
अधिकंतववित्तानमधिकाचगतिस्तव अधिकंतववैश्वर्यंतच्चलनावबुध्यसे ४४ बाल्याद्वासंभ्रमाद्वापिभयाद्वाप्यवि।
मोक्षजात् उत्पन्नेचापिविज्ञानेनाधिगच्छसितांगतिं ४५ व्यवसायेनशुद्धेनमहद्भिश्छिन्नसंशयः विमुच्यहृदयग्रंथीना
साद्यतितांगतिं ४६ भवांश्चोत्पन्नविज्ञानः स्थिरबुद्धिरलोलुपः व्यवसायादृतेब्रह्मन्नासादयतितत्परं ४७ नास्तिते
सुखदुःखेषुविशेषोनास्तिलोलुपः नौत्सुक्यंनस्पृहीतेपुनरागउपजायते ४८ नबंधुश्चनुबंधस्तेनभयेष्वस्तितेभयं प
श्यामित्वांमहाभागतुल्यलोष्टाश्मकांचनं ४९ अहंत्वामनुपश्यामियेचाप्यन्येमनीषिणः आस्थितंपरमंमार्गमक्षय
तमनामयं ५० ॥ ॥ ॥ ॥

५१ अध्यायः एतत्श्रवणानुवचनमित्यादिरध्यायस्यतात्पर्यंतुयत्रशिवविष्णुस्कंदपद्मादारीनांमहामहिम्नांसमागम तत्रपुत्राप्तयेदेवैर्योगिनाध्यानार्थंगंतव्यंविघाच

यत्फलंब्राह्मणस्येहमोक्षार्थंश्रवणात्मकः तस्मिन्हिवर्तसेब्रह्मन्किमन्यत्परिपृच्छसि ५१ शांतोमोक्षधर्मेषुमुमुक्षोस्तस्य भीष्मस्तवा
चएतेनचकृतानुवचनेनकृतात्माकृतनिश्चयः आत्मनात्मानमास्थायदृष्ट्वाचात्मानमात्मना १ कृतकार्यःसुखीशांतस्तूष्णीं
प्रायादुदङ्मुखः शैशिरंगिरिमुद्दिश्यसधर्मोमातरिश्वनः २ एतस्मिन्नेवकालेतुदेवर्षिर्नारदस्तथा हिमवंतमियात्द्रष्टुंसि
द्धचारणसेवितं ३ तमप्सरोगणाकीर्णंशांतस्वननिनादितं किंनराणांसहस्रैश्चभृंगराजैस्तथैवच ४ मद्गुभिःखंजरीटैश्चवि
चित्रैर्जीवंजीवकैः चित्रवर्णैर्मयूरैश्च केकाशतविराजितैः राजहंससमूहैश्चहृष्टैःपरभृतैस्तथा ६ पक्षिराजोगरु
त्मांश्चयंनित्यमधितिष्ठति चत्वारोलोकपालाश्चदेवाःसर्षिगणास्तथा ७ तत्रनित्यंसमायातिलोकस्यहितकाम्य
या विष्णुनायत्रपुत्रार्थेतपस्तप्तंमहात्मना ८ तत्रैवचकुमारेणबाल्येक्षिप्तादिवौकसः शक्तिर्न्यस्ताक्षितितलेत्रैलोक्य
मवमन्यवै ९ तत्रोवाचजगत्स्कंदःक्षिपन्वाक्यमिदंतदा योन्योस्तिमत्तोभ्यधिकोविप्रायस्याधिकंप्रियाः १० योब्र
ह्मण्योद्वितीयोस्तित्रिषुलोकेषुवीर्यवान् सोभ्युद्धरत्विमांशक्तिमथवाकंपयत्विति ११ ॥ ॥ ॥ ॥

गोपनीयागुरुशिष्याभ्यांचैषोचितधर्मस्थेयमिति १ शैशिरंगिरिंहिमालयं २ ३ ४ ५ ६ ७ ८ ९ १० ११
खंजरीटैश्चेति खंजरीटः खंजन इति वैजयंती जीवंजीवादयो जलचरपक्षिभेदाः । केका मयूरस्य वाचः श्वेतैरक्तैरिति राजहंसस्य हृष्टैरितरपक्षिभ्यो वैलक्षण्यं प्रसूचितमि
तिवो द्रव्यम् ३ ।४। १७ । १३

नक्रुलाथ्यिता लोकाः कद्दमामुद्धरेदिति अथ देवगणाः सर्वे संभ्रांतेंद्रियमानसः १२ अपश्यन्भगवान्विष्णुः क्षिप्तं सासुरराक्षसं कि
लत्र सुकृतं कार्यं भवेदिति विचिंतयन् १३ अनामयं ततः क्षेपमेवेस्तत्र च पावकिं संप्रगृह्य विशुद्धात्मा शक्तिं प्रह्वलितां तदा १४ कं
पयामास सव्येन पाणिना पुरुषोत्तमः शक्त्यां तु कंप्यमानायां विष्णुना बलिना तदा १५ मेदिनी कंपिता सर्वा सशैलवनकानना श
क्तेनापि समुद्धर्तुं कंपिता साभवत्तदा १६ रक्षितारं कं राजस्य धर्षणात्प्रभविष्णुना तां कंपयित्वा भगवान्प्रह्लादमिदमब्रवीत् १७
पश्य वीर्यं कुमारस्य नैतदन्यः करिष्यति सोमप्रममाणस्त हायं समुद्धरणनिश्चितः १८ जग्राह तां तदा शक्तिं नैवेनां समकंपयत्
नाहं महानमुत्क्राम सप्रधितो गिरिमंडिनि १९ विह्वलः प्रापतद्भूमौ हिरण्यकशिपोस्सुतः ततोऽन्तरिक्षं गत्वा शैलराजस्य पार्श्वतः
२० तपो तप्यत दुर्धर्षं तानतिसंवत्सरध्वजः पावकेन परिक्षिप्तं दीप्यतायस्य चाश्रमं २१ आदित्यपर्वतं नाम दुर्धर्षमकृतात्मभि
स्कंद ५ : न तत्र शक्यते गंतुं पक्षैः सदानवैः २२ दशयोजनविस्तारमग्निज्वालासमावृतं भगवान्पावकस्तत्र स्वयं तिष्ठति वीर्यवा।
न् २३ सर्वान्विघ्नान्प्रशमयन्महादेवस्य धीमतः दिव्यं वर्षसहस्रं हि पादेनैकेन तिष्ठतः २४ देवान्संतापयंस्तत्र महादेवो
महाव्रतः ऐंद्रीं तु दिशमास्थाय शैलराजस्य धीमतः २५ विविक्ते पर्वततटे पाराशर्यो महातपाः वेदानध्यापयामास व्यासः
शिष्यान्महातपाः २६ सुमंतुं च महाभागं वैशंपायनमेव च जैमिनिं च महाप्राज्ञं पैलं चापि तपस्विनं २७ यत्र शिष्यैः
परिवृतो व्यासस्त्वास्ते महातपाः तमाश्रमपदं रम्यं ददर्श पितुरुत्तमं २८ आरणेयो विशुद्धात्मा नभसीव दिवाकरः अथ व्या
सपरिक्षिप्तं ॥ ॥ ॥ ॥ ॥

मो०
४८८
488

लंतमिवपावकं २८ ददर्शसुतमायांतंदिवाकरसमप्रभं असज्जमानंवृक्षेषुशैलेषुविषमेषुच योगयुक्तंमहात्मानंयथावाणंगुरोश्च्यु
तं २९ सोभिगम्यपितुःपादावगृह्णादरणीसुतः यथोपजोषंतैश्चापिसमागछन्महामुनिः ३० ततोनिवेदयामाससपित्रेसर्वम
शेषतः शुकोजनकराजेनसंवादंप्रीतिमानसः ३१ एवमध्यापयंछिष्यान्व्यासःपुत्रंचवीर्यवान् उवासहिमवत्पृष्ठेपाराशर्योमहा
मुनिः ३२ ततःकदाचिच्छिष्यास्तंपरिवार्यावतस्थिरे वेदाध्ययनसंपन्नाःशांतात्मानोजितेंद्रियाः ३३ वेदेषुनिष्ठांसंप्राप्यसां
गेष्वपितपस्विनः अथोचुस्तेतदाव्यासंशिष्याःप्रांजलयोगुरुं ३४ शिष्याऊचुः महतातेजसायुक्तायशसाचापिवर्द्धिताः एकंत्वि
दानीमिछामोगुरुणानुग्रहंकृतं ३५ इतितेषांवचःश्रुत्वाब्रह्मर्षिस्तानुवाचह उच्यतामितितद्वत्सायद्वःकार्यंप्रियंमया ३६ ए
तद्वाक्यंगुरोःश्रुत्वाशिष्यास्तेहृष्टमानसाः पुनःप्रांजलयोभूत्वाप्रणम्यशिरसागुरुं ३७ ऊचुस्तेसहिताराजन्निदंवचनमुत्त
मं यदिप्रीतउपाध्यायोधन्याःस्मोमुनिसत्तम ३८ कांक्षामस्तुवयंसर्वेवरंदातुंमहर्षिणा षष्ठःशिष्योनतेख्यातिंगछेदत्रप्रसी
दनः ३९ चत्वारस्तेवयंशिष्यागुरुपुत्रश्चपंचमः इहवेदाःप्रतिष्ठेरन्नेषनःकांक्षितोवरः ४० शिष्याणांवचनंश्रुत्वाव्यासोवे
दार्थतत्ववित् पराशरात्मजोधीमान्परलोकार्थचिंतकः ४१ उवाचशिष्यान्धर्मात्माधर्म्यंनैःश्रेयसंवचः ब्राह्मणायसदादे
यंब्रह्मशुश्रूषवेतथा ४२ ब्रह्मलोकेनिवासंयोध्रुवंसमभिकांक्षति भवंतोवहुलाःसंतुवेदोविस्तार्यतामयं ४३ नाशिष्ये
संप्रदातव्योनाव्रतेनाकृतात्मनि एतेशिष्यगुणाःसर्वेविज्ञातव्यायथार्थतः ४४ नापरीक्षितचारित्रेविद्यादेयाकथंचन यथा मो०
हिकनकंशुद्धंतापछेदनिकर्षणैः ४५ ॥ ॥ ॥ ॥ ॥ ४८८

परीक्षेततथाशिष्यानीक्षेत्कुलगुणादिभिः नतियोज्यास्त्ववः शिष्याश्चनियोगेमहाभये ४६
यथामतियथापाठंतथाविद्याफलिष्यति सर्वस्वस्तुरगांशिनसर्वेभद्राणिपश्यन्तु ४७ श्री
वेयश्चतुरोवर्णानकृत्वाब्राह्मणमग्रतः वेदस्याध्ययनेहीदंतच्चकार्यंमहत्स्मृतं ४८ ॥ ॥

मो०
४८९

५१ अध्यायः एतच्छ्रुत्वा गुरोर्वाक्यमित्यादेः व्यासः पुत्रमवारयदित्यंतस्य तात्पर्यं विद्याप्रचारः कर्तव्यः विदुषापि वेदाध्ययनं न त्याज्यं स्वाध्यायानध्यायपरिपालनं च

भवे३

489

कृत्स्नमर्थमिहेदं वा नो वेदाः सृष्टाः स्वयंभुवा यो निर्वदेत्तं संमोहात्ब्राह्मणं वेदपारगं ४९ सोभिध्यानाद्ब्राह्मणस्य पराभूया
दसंशयं यश्चाधर्मेण विब्रूयाद्यश्चाधर्मेण पृच्छति ५० तयोरन्यतरः प्रैति विद्वेषं चाधिगच्छति एतद्वः सर्वमाख्यातं स्वाध्या
यस्य विधिं प्रति उपकुर्याच्च शिष्याणामेतच्च हृदि वो भवेत् ५१ शांतिमोक्षधर्मेषु शुकोत्पत्तौ भीष्म उवाच एतच्छ्रुत्वा गुरोः
वाक्यं व्यासशिष्या महौजसः अन्योन्यं हृष्टमनसः परिषस्वजिरे तदा १ उक्ताः स्मो यद्भगवता तदात्वायतिसंहितं तन्नो
मनसि संरूढं करिष्यामस्तथा च तत् २ अन्योन्यं च पुनः संभाष्य सुप्रीतमनसः पुनः विज्ञापयंति स्म गुरुं पुनर्वाक्यविशारदा
: ३ शैलादस्मान्महीं गंतुं कांक्षितं नो महामुने वेदाननेकधा कर्तुं यदि ते रुचितं प्रभो ४ शिष्याणां वचनं श्रुत्वा पराशर
सुतः प्रभुः प्रत्युवाच ततो वाक्यं धर्मार्थसहितं हितं ५ क्षितिं वा देवलोकं वा गम्यतां यदि रोचते अप्रमादश्च वः कार्यो ब्र
ह्म हि प्रचुरच्छलं ६ तेनुज्ञातास्ततः सर्वे गुरुणा सत्यवादिना जग्मुः प्रदक्षिणं कृत्वा व्यासं मूर्ध्नाभिवाद्य च ७ ॥ ॥

एम०
४८९

कर्तव्यमिति १ तदात्वायतिसंहितं तदात्वे तत्काले आयतौ उत्तरकाले च संहितं सम्यक् हितं २ ३ ४ ५ ६ ७ ८

चातुर्होत्रंचतुर्होतृसंज्ञकामंत्राः ७ चित्तिः स्रुक् चित्तमाज्यमित्यादयोऽध्यात्माधियज्ञयोरभेददर्शनार्थाः तत्पूर्वकंप्रवृत्तंकर्मचातुर्होत्रंअग्निहोत्रादिकंसोमांतंअकल्पयन्नस्य

अवतीर्यमहींतेथचातुर्होत्रमकल्पयन् संयाजयंतोविप्रांश्चराजन्यांश्चविशस्तथा ८ इज्यमानाद्विजैर्नित्यंमोदमानागृहेरताः या
जनाध्यापनरताश्रीमंतोलोकविश्रुताः ९ अवतीर्णोशुशिष्यैर्व्यासः पुत्रसहायवान् तूष्णींध्यानपरोधीमानेकांतेसमुपाविश
त १० तंददर्शाश्रमपदेनारदः सुमहातपाः अथैनमब्रवीत्कालेमधुराक्षरयागिरा ११ भोभोब्रह्मर्षिवासिष्ठब्रह्मघोषानव
र्तते एकोध्यानपरस्तूष्णींकिमास्सेचिंतयन्निव १२ ब्रह्मघोषैर्विरहितः पर्वतोयंनशोभते रजसातमसाचैवसोमः सोपप्लवो
यथा १३ नभ्राजतेयथापूर्वंनिषादानामिवालयः देवर्षिगणसंजुष्टोपिवेदध्वनिनिराकृतः १४ ऋषयश्चहिदेवाश्चगंधर्वाश्च
महौजसः वियुक्ताब्रह्मघोषैस्तेनभ्राजंतेयथापुरा १५ नारदस्यवचः श्रुत्वाकृष्णद्वैपायनोब्रवीत् महर्षेयत्त्वयाप्रोक्तंवेद
वादविचक्षण १६ एतन्मनोनुकूलंमेभवानर्हतिभाषितुं सर्वज्ञः सर्वदर्शीचसर्वत्रचकुतूहली १७ त्रिषुलोकेषुयद्वृत्तंस
र्वंतवमतेस्थितं तदाज्ञापयविप्रर्षेब्रूहिकिंकरवाणिते १८ यन्मयासमनुष्ठेयंब्रह्मर्षेतदुदाहर वियुक्तस्यहशिष्यैर्मेनाति
हृष्टमिदंमनः १९ ॥

वर्तितवंतः १७ सोऽहंवोराज्ञयस्तः १८ नातिहृष्टमिदंमनइतिविदुषामपिशिष्यादिसंयोगवियोगवियोगजंसुखदुःखमपरिहार्यमितिभावः १९ ॥ ॥

मो०
४९०
490

अनाम्नायः अनावृत्तिस्तत्र एव मलो दूषणं येषु २१ ततोनध्याय इत्यादि येयः योगिनां स्वच्छपाकृत्येन ब्रह्मांडे संचारयोग्यता इच्छया देहत्यागश्चयया भवतीत्याह दिव्यं विद्यां वक्तुं प्रव
त्तेते २६ कुत इति वायोर्मूलकारणं प्रश्नः विचेष्टितमिति वायुकर्मप्रश्नः २८ प्रश्नमभिनंदन्नुत्पन्नसामर्थ्यमनित्यताल्साच्च तिरुर्लभमेतिसूचयति दिव्यमिति योगसंस्कृतं चक्षु

नारद उवाच अनाम्नायमला वेदा ब्राह्मणस्याव्रतं मलं मलं पृथिव्या वाहीकाः स्त्रीणां कौतूहलं मलं २१ अधीयतां भवान्वेदा
न्साधु पुत्रेण धीमता विधुन्वन्ब्रह्मघोषेण रक्षोभयकृतं तमः २१ भीष्म उवाच नारदस्य वचः श्रुत्वा व्यासः परमधर्मवित्
तथेत्युवाच संहृष्टो वेदाभ्यासदृढव्रतः २२ शुकेन सह पुत्रेण वेदाभ्यासमथाकरोत् स्वरेणोच्चैः सशैक्ष्येण लोकानापूरय
न्निव २३ तयोरभ्यसतोरेवं नानाधर्मप्रवादिनोः वातोतिमात्रं प्रववौ समुद्रानिलवेजितः २४ ततोनध्याय इति तं
व्यासः पुत्रमवारयत् शुको वारितमात्रस्तु कौतूहलसमन्वितः २५ अपृच्छत्पितरं ब्रह्मन्कुतो वायुरभूदयं आख्या
तुमर्हति भवान्वायोः सर्वं विचेष्टितं २६ शुकस्यैतद्वचः श्रुत्वा व्यासः परमविस्मितः अनध्यायनिमित्तेस्मिन्निदं वच
नमब्रवीत् २७ दिव्यं ते चक्षुरुत्पन्नं स्वयं ते निर्मलं मनः तमसा रजसा चापि त्यक्तः सत्वेव्यवस्थितः २८ ॥ ॥

येव हितार्थयाहितात् मनश्च निर्मलं अतीतादिग्राहिसेसर्वज्ञतादिहेतो बुद्धिसत्वे २८ ॥ ॥ ॥ ॥

राम०
४९०

आत्मनिवुद्धेवेदानेवेदार्थान् अस्यक्तहापोहायोहाम्भापरिभाया वुद्धानिश्चयेनसमनुचिंतयवापुः कुतोऽश्रिदिसादिकंविचारय ३० देवयानेतियोविद्भ्योऽमोप
कस्यपरमात्मनः संवंधी देवयानोऽर्चिरादिमार्गस्तत्रचरतीतितेनमार्गेणासालोकान् उपासकानविस्मुलोकंत्र्यपुनरावृत्तिप्रदृश्मापयतीत्यर्थः पितृयानस्थधूमा
दिपितृयाणमार्गप्रश्वायेमेवसतुतामसः पुनरावृत्तिदत्वात ३१ पृथिव्यामिति पृथिव्यांपिरे । अंतरिक्षेव्रह्मांडेसंवांतिसंगच्छंति वायुमार्गाः वायुसंचारस्था
नानि । तत्रदेहेतावत्तवायुस्थानवर्णवीजानिनकुलीशयोगपारायणोप्रोक्तानिप्राणोघ्राणाग्रहन्नाभिपादांगुष्ठांतसंस्थितिः नीलः सोकारेफादिवीजेनविनि

आदर्शे स्वामिव छायां पश्य स्वात्मानमात्मना अस्यात्मनिश्चयं वेदान्बुद्ध्वा समनुचिंतय ३० देवयानचरो विद्वान् पितृयानस्थ
तामसः द्वावेतौ प्रस्तपंथानौ दिवं चाधश्च गच्छतः ३१ पृथिव्यामंतरिक्षे च यत्र संवांति वायवः संघेते वायुमार्गा वेतान्निवोधानुपूर्
वशः ३२

योजितः ॐ यमित्यर्थः रूस्लोपानः रक्तादिस्थः पृष्ठपृष्ठांतपार्श्वगः सतारकनकारांतवीजेनविनियोजितः ॐ पमित्यर्थः शक्रचापनिभोव्यानस्त्वगिंद्रियनिकेतनः तार
कोपेतयांतांतवीजेनतेजोविराजितः ॐ लमित्यर्थः नरेंद्रस्योदानध्यानाल्पमकंठहृस्तनलाश्रयः उदानोव्यवनतच्छायास्तारकाक्रांतयांतयुक् ॐ रमित्यर्थः श्वेतः
समानोहृन्नाभिसर्वसंधिनिकेतनः प्रणवाक्रांतलांतेनवीजेनासंततमुज्वलः इति ॐ वमित्यर्थः अहसमममार्गोतुजीवन्मुक्तिविदेहमुक्तिर्मेरोवक्ष्यति । देवगणा ।
अध्यात्मं इंद्रियाणितेषांपुत्रस्समानः इंद्रियाणांसामान्याहृत्तिस्वसमानाख्यः तदुक्तं सांख्यसप्तत्यांसामान्याकरणाहृत्तिः प्राणाद्यावायवः पंचेति । एवं अधिदै
वमपिसाध्यानांदेवानांस मानाख्यस्तथैः पिंडव्रह्मांडयोरभेदात ३२ ॥ ३२ ॥ ३२ ॥ ॥

सामान्यरूपं । सामान्यरूपं ।

मो० ५९१

३३ उदान इति सिरोवायुः तेनोन्नसर्पूर्वकार्यत्वात् उन्नेरोञ्चरं स्थूलत्वं ज्ञेयं ३४ अनपत्य इति प्राणस्य कार्यान्तरं नास्ति सर्वापेक्षया स्थूलत्वं च दर्शितं ३५ पिंडे प्राणा
कार्ये प्राणा शब्द प्रवृत्तिनिमित्तं चाह प्राणिनामिति ३६ अत्रैव वा धिदैवे कर्म नामनी आह प्रेरयतीति सोर्द्धेन । धूम्रो अभ्रजा नेमेघानं स्नेहं स्नेह लं अथ वोस्नेह गु
णयुक्तं जलं वृष्टिकाले प्राप्य अवरे प्रेरयतीति योजना । सप्तवायुः धूम इति स्नेह क्रमेण विद्युत्त्वं प्राप्य महाद्युतिः स्वभवति । विद्युन्मय इति पंचमो त्यहो पे

५१

तत्रैव गणाः साध्या महाभूता महाबलाः तेषामप्यभवत्पुत्रः समानो नाम दुर्जयः ३३ उदानस्तस्य पुत्रोभूद्व्यानस्तस्याभव
त्सुतः अपानश्च ततो ज्ञेयः प्राणश्चापि ततोपरः ३४ अनपत्यो भवत्प्राणो दुर्द्धर्षः शत्रुतापनः पृथक्कर्माणि तेषां तु
प्रवक्ष्यामि यथातथं ३५ प्राणिनां सर्वतो वायुश्चेष्टां वर्त्तयते पृथक् प्राणनाच्चैव भूतानां प्राण इत्यभिधीयते ३६ प्रेरय
त्यभ्रसंघातान् धूमजांश्चोष्मजांश्च यः प्रथमः प्रथमे मार्गे प्रवहो नाम योनिलः अंबरे स्नेहमभ्येत्य तडिद्भ्यश्चोत्तमद्यु
तिः ३७ ॥ ॥

प्रथमः विष्णुरिव समानादिक्रमेण सप्तमोपि संहारक्रमेण प्रथम इत्यर्थः अयं भावः । पृथ्वोद्वारे तद्धारणान्तर्हन्नाभिपादांगुष्ठानां मध्ये न्यत्तमे स्थाने प्राणा राम०
निरोध्य नीलवर्णं प्राणं ॐ यमिति वीजं शरीरे संचिन्तयन् योगी कियता कालेन सिद्धिं प्राप्तो जीवन्नेव शरीरेण प्रवहमार्गेण संचरन्निहांते च प्रवहे ५९१
णान्तरात्म्य प्राप्नोति एवं सर्वत्र प्रयोगो ज्ञेय इति ३७

आध्यात्मिकस्याधानस्याधिदैवकर्मनामनीआह आवह इति मेघचक्रं आसमन्तात् वहतीत्यावहः आदौ न्नं अनेन उद्दीपके नजठराग्निरिति आदानो ऽपानः अपा
नस्य जाठरोद्दीपकत्वमाह याज्ञवल्क्यः स्वयं न्यानं संप्राप्य मेनेव सह माहतः प्रयाति ज्वलनं तत्र प्राणोमध्यगतः पुनः वायुना वाजितो वह्निरेष्णानि तप्यते शनैः शनैः त
द्धा ज्वल ति विधिर्द्वे सकले देहमध्यमे प्राणः अपानं प्राप्य प्रवर्ध्य ज्वलनं प्रयाति प्रवर्त्तयति अपानेन वायुना वाजितः वीजितः वा विधूननेन उक्तम् इति गुर्गता ह्राधातो

आवहो नाम संवाति द्वितीयः श्वसनो नदन् उदयं ज्योतिषां शश्वत्सोमादीनां करोति यः ३८ अंतर्देहेषु चादानं यं वदं
ति मनीषिणः यश्चतुर्भ्यः समुद्रेभ्यो वायुरुद्धरते जलं उद्धृत्याददते चापो जीमूतेभ्योंऽबरेऽनिलः ३९ योऽद्भिः संयोज्य
जीमूतान्पर्जन्याय प्रयच्छति उद्वहो नाम वंहिष्ठस्तृतीयः सदागतिः ४० समुह्यमाना बहुधा येन नीताः पृथग्घ
नाः वर्षमोक्षकृतारंभास्ते भवंति घनाघनाः ४१ ॥ ॥ ॥ ॥ ॥

निघ्नायांस्त्वपाहविप्रेंद्र गार्गिरिति याज्ञवल्क्यस्त्रोकार्थः आदानरूपमपानस्य नामांतरं योगिप्रसिद्धमित्यर्थः ३८ अंतर्देहेष्विस्मंई उदानमिति पाठः उन्नतस्त्वपि आ
द्धृत्याददानसाम्यादुद्वहादानयोरैक्यं ३९ पर्जन्याय वृष्ट्यभिमानिदेवतायै वंहिष्ठः अतिशयेन वढुः ४० वर्षमोक्षाय कृतः आरंभो यैस्ते रिच्यमानो मेघः पूर्णोपू
र्णोलाह्नाघ्नघन उच्यत इत्यर्थः ४१ ॥

संहता: संवीभू[illegible]ताश्चपियेनहेतुनातेश्यक्तत्राविद्धाः प्रक्षिप्ताः भवंति अतस्तेषां बाधमानवेगुवन्नदंतांशब्दं कुर्वंतानदाइतिनामभवतिरक्षणार्थायेगोस्तनवन्तसे
चनातेरिक्तास्त्रपितेमेघलंयांतिमिहसेचनइतिधातुः नतु[illegible]रसफलवन्नश्यंतीत्यर्थः ५२ यो [illegible] संविति। वहनइतिपादेपिसएवार्थः।इषुहिंसायामितिधातोरूपं ५३
मर्दनेमेवाहयेनेतिवलेनपरोपमर्देनञ्चहंतिगछंतितिवलाहकाः इषोदरादित्वान्नकारलोपः ओहिगतौ इतिधातुः ५४ दारुणोति। दारुणाः लोकनाशसूचकाः

संहतायेनचाविद्धाभवंतिनदंतानदाः रक्षणार्थायसंभृतामेघत्वमुपयांतिच ५२ योसौवहतिभूतानांविमानानिवि
हायसा चतुर्थःसंवहोनामवायुःसगिरिमर्दनः ५३ येनवेगवताहृग्णारूक्षेणारुजतानगोन वायुनासहितामेघा
स्तेभवंतिवलाहकाः ५४ दारुणोत्पातसंचारोनभसस्तनयित्नुवान् पंचमःसमहावेगोविवहोनाममारुतः ५५
यस्मिन्पारिप्लवादिव्यावहंत्यापोविहायसा पुण्यंचाकाशगंगायास्तोयंविष्टभ्यतिष्ठति ५६ दूरात्प्रतिहतोयस्मिन्ने
करश्मिर्दिवाकरः योनिरंशुसहस्रस्ययेनभातिवसुंधरा ५७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

धूमकेतुसंवर्त्तमेघादयः उत्पातास्तेषांसंचारोयेनस्तनयित्नुःसगर्जितोमेघस्तद्वान्विषमवहनाद्विवहः ५५ परित्तः उपर्युपर्यवस्थेवेगासंततिनलघः यंतीतिप
रिप्लवाः स्रोतोयुक्ताः यः तोयंविष्टभ्यव्याकाशएवावस्थाप्य ५६ दूरादितियेनप्रतिहतः सूर्यःसहस्ररश्मिरप्येकरश्मिरिवभातीत्यर्थः ५० ५७ ५० राम० ४९२

एवं पितृमहोदानगतानस्त्राधिकारिकान्पंचवायूनुक्त्वा षष्ठं तदंतर्गतमपि तद्व्यापिनं वायुमाह यस्मादिति यस्मात्सहस्रारस्थितात् चिंद्राद्रावमानं त्रयं सोमो ब्रह्मा
डांतर्गतः आप्यायते क्षीणः ब्रह्मांडव्यवनकृतापि ब्रह्मांडांतर्गतमन स्थितो ब्रह्मांडाप्यायनकृत एव तद्वायं प्राप्य आप्यायते न इति सः परिवहः सर्वतो वहनाद्व्यापकः कारणात्मा षष्ठो
वायुरित्यर्थः ४८ अनुकालेकल्पांते निरस्यति संहरति मृत्युवैवस्वतावपि यदनुरोधिनौ तयोरपि प्रेरक इत्यर्थः एतेन मृत्युरसानां ब्रह्मादीनां नश्वरत्वं लीनत्वं कैवल्यं मुक्ति
कल्पायमिदं ४९ मोक्षध्यात्मचिंतका इति पूजायां बहुवचनं पुत्रसंबोधनं । शांतया वासाद्य अंतर विक्षेपरहितया बुद्ध्या सम्यक्कृत्स्नं द्रष्टारोस्मीति वा कार्यानुसंधा

यस्मादाप्यायते सोमः क्षीणः संपूर्णमंडलः षष्ठः परिवहो नाम स वायुर्जयतां वरः ४८ सर्वप्राणभृतां प्राणान् योनुका
ले निरस्यति यस्य वर्त्मानुवर्तेते मृत्युवैवस्वतावुभौ ४९ सम्यगन्वीक्षतां बुद्ध्या शांतयाध्यात्मचिंतकाः ध्यानाभ्यासा
भिरामाणां योमृतत्वाय कल्पते ५० यं समासाद्य वेगेन दिशामंतं प्रपेदिरे दक्षस्य दश पुत्राणां सहस्राणि प्रजापते
: ५१ येन सृष्टः पराभूतो यात्येव न निवर्तते परावहो नाम परो वायुः स दुरतिक्रमः ५२ ॥ ॥ ॥ ॥

नपूर्वकं अन्वीक्षतां श्रवणमनननिदिध्यासनेन पश्यतां ध्यानमेवाभ्यासमित्येवं येषां तेषां यो ऽमृतत्वाय मोक्षाय कल्पते ५० दिशामंतं प्रति पेदिरे ब्रह्मांडं निर्भिद्य गता इ
त्यर्थः ५१ सप्तममाह येनेति सृष्टः उपसृष्टः एकरूपवायं निर्बीजसमाधिगम्यः यावदारब्धकर्मभोगं यस्मिन्लीनोपि योगी संस्कारशेषसत्त्वात्पुन
एव वर्तते। प्रारब्धभोगांते देहनाशे तु नावर्तते इति एतयोर्भेदः अतो दक्षपुत्राणामपि आरब्धकर्मभोगांतानावृत्तिर्वेद्या ५२ ॥ ॥ ॥

मो० ५९३

493

अद्भिः स्वःउनशून्यायाः अदीनायाः परमर्चितः पुत्रइवपुत्रारूपभेदाः ५४ पर्वतकंपनेहेतुमाहविष्णोरिति।यतोऽयंवेदोविष्णोरिति।यतोऽयंवेदोविष्णोर्निश्वास
वातः महतोभूतस्यनिश्वसितमेतद्यदृग्वेदोयजुर्वेदइत्यादिश्रुतेः।सयदावेगेनसमीरितः सहसाऽकस्मात्उदीर्यतेउच्चैः पठ्यतेतदाजगद्व्यथते मूलपुरुष

एवमेतेदितेःपुत्रामारुताःपरमाद्भुताः अनारतंतेसंवांतिसर्वगाःसर्वधारिणः ५३ एतत्तुमहदाश्चर्यंयदयंपर्वतोत्त
मः कंपितःसहसातेनवायुनाभिप्रवायता ५४ विष्णोर्निश्वासवातोयंयदावेगसमीरितः सहसोदीर्यतेतातज
गत्प्रव्यथतेतदा ५५ तस्माद्ब्रह्मविदोवेदान्नाधीयंतेतिवायति वायोर्वायुभयंह्युक्तंब्रह्मतत्पीडितंभवेत् ५६
एतावदुक्त्वावचनंपराशरसुतःप्रभुः उक्त्वापुत्रमधीष्वेतिव्योमगंगामगात्तदा ५७ शांतौमोक्षधर्मेषुशुकोत्प
त्तिःसमाप्ता ॥

निश्वासस्सहसाउच्चैरुदीरितःकदाचित्सर्वेषां हरेरित्थितिर्देवोरितिभावः ५५ आख्यापिकायाविधित्सितमाहतस्मादितिवायुर्वेदरूपोवेगेनोच्चार्यमाणःएवं
वायुर्वायुयुक्तंभयजनकोभवतीतितेनचतद्ब्रह्म जगद्रूपंवेदरूपंवापीडितंभवतिअतोमहावायौवायतिवातिसतिनाध्येतव्यमित्यर्थः ५७ शांतौपरिदृश्यवाय
त्मतः

राम० ५९३

५५

श्या २

आत्मज्ञानेन संचित क्रियमाणयोः कर्मणोर्दाहश्लेषौ भवतः प्रारब्धं तु ज्ञानेनाप्यपरिहार्यमिति सर्वत्र सिद्धं योगी तु निर्विकल्पकसमाध्यभ्यासेन वा सुल्लभावत् गृहांतरमिव देहा
द्देहांतरं प्रविश्य वा सुकर्वर्यथेष्टं देहयोगेन वा देहसिद्ध्या वा देहारंभकं कर्म प्रतिबध्नाति उच्छिनत्ति दर्शयिष्यंस्तु शुको मार्गं तनमारभ्यते। अत एव योगी ज्ञानिभ्योपि महानिति गी

भीष्मउवाच एतस्मिन्नंतरे शून्ये नारदः समुपागमत् शुकं स्वाध्यायनिरतं वेदार्थान्प्रष्टुमीप्सया १ देवर्षिं तु शुको दृष्ट्वा ना
रदं समुपस्थितं अर्घ्यपूर्वेण विधिना वेदोक्तेनाभ्यपूजयत् २ नारदोथाब्रवीत्प्रीतो ब्रूहि धर्मभृतां वर केन त्वां श्रेयसा वत्स योज
यामीति हृष्टवत् ३ नारदस्य वचः श्रुत्वा शुकः प्रोवाच भारत तस्मिन्लोके हितं यत्स्यात्तेन मां योक्तुमर्हसि ४ नारद उवाच
तत्त्वं जिज्ञासतां पूर्वमृषीणां भावितात्मनां सनत्कुमारो भगवानिदं वचनमब्रवीत् ५ नास्ति विद्यासमं चक्षुर्नास्ति सत्यसमं
तपः नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखं ६ निवृत्तिः कर्मणः पापात्सततं पुण्यशीलता सद्वृत्तिः समुदाचारः श्रेय ए
तदनुत्तमं ७ मानुष्यमसुखं प्राप्य यः सज्जति स मुह्यति नालं स दुःखमोक्षाय संयोगो दुःखलक्षणं ८ सक्तस्य बुद्धिश्च
लति मोहजालविवर्द्धिनी मोहजालावृतो दुःखमिह चामुत्र सोश्नुते ९ ॥ ॥ ॥ ॥ ॥ ॥

तास्वप्युक्तं तपस्विभ्योधिको योगी ज्ञानिभ्योपि मतोधिकः इति तत्र तावल्लोकदृष्टसहानार्थं तु शुकं त्वमरक्ष्येनेनारदेन वा केयना एतस्मिन्नंतरे इत्यादिना शुकनारद
यागमत् शुको वेदार्थान्प्रष्टुमीहया नारदमभ्यपूजयदिति संबंधः १ ॥ ॥ ॥ ॥ ॥ ॥

मो० ५९४

५९६

१५ आत्मभूतैरेहेंद्रियादिभिः सह चवर्त्तते विनैव पृथक्कवर्त्ततेकः अतद्भूतः देहादितादात्म्यवाधितात्केवलीभूतः १६ १८ २० २२ ॥ ॥ ॥ ॥ ॥

छ्रियंरक्षे २

सर्वोपायात्तुकामस्यक्रोधस्यचविनिग्रहः कार्यः श्रेयोर्थिनातौहिश्रेयोघातार्थमुद्यतौ १० नित्यंक्रोधात्तपोरक्षेत्मत्सरात्
विद्यांमानावमानाभ्यामात्मानंतुप्रमादतः ११ आनृशंस्यंपरोधर्मः क्षमाचपरमंवलं आत्मज्ञानंपरंज्ञानंनसत्याद्विद्यतेपरं १२
सत्यस्यवचनंश्रेयः सत्यादपिहितंवदेत् यद्भूतहितमत्यन्तमेतत्सत्यंमतंमम १३ सर्वारंभपरित्यागीनिराशीर्निष्परिग्रहः येनस
र्वंपरित्यक्तंसविद्वान्सचपंडितः १४ इंद्रियैरिंद्रियार्थेभ्यश्चरन्नात्मवशैरिह असज्जमानः शांतात्मानिर्विकारः समाहितः १५
आत्मभूतैरतद्भूतः सहचैवविनैवच सविमुक्तः परंश्रेयोनचिरेणाधिगच्छति १६ अदर्शनमसंस्पर्शस्तथासंभाषणंसदा यस्य
भूतैः सहमुनेसश्रेयोविंदतेपरं १७ नहिंस्यात्सर्वभूतानिमैत्रायणगतश्चरेत् नेदंजन्मसमासाद्यवैरंकुर्वीतकेनचित् १८
आकिंचन्यंसुसंतोषोनिराशीस्त्वमचापलं एतदाहुः परंश्रेयआत्मज्ञस्यजितात्मनः १९ परिग्रहंपरित्यज्यभवतातजितेंद्रि
यः अशोकंस्थानमातिष्ठइहचामुत्रचाभयं २० निरामिषानशोचंतित्यजेहामिषमात्मनः परित्यज्यामिषंसौम्यदुःखता
पाद्विमोक्ष्यसे २१ तपोनित्येनदांतेनमुनिनासंयतात्मना अजितंजेतुकामेनभाव्यंसंगेष्वसंगिना २२ ॥

शाम० ५९४

३३ शेषग्रंथः स्पष्टार्थो व्याख्यातप्रायश्चेति न व्याख्यायते २४ २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

गुणाभ्योगेष्वनासक्त एकचर्य्यारतः सदा आत्मरोगानचिरादेव सुखमायात्यनुत्तमं २३ इंद्रियाणामेषु मूलेषु प्रसक्तो रमते पुनिः विडिम्मज्ञा
नरः संततज्ञानतस्मोन शोचति २४ शुभैर्लभति देवत्वं माम्बिज्जेन्म मानुषं अशुभैस्त्वाप्यधोजन्मकर्मभिर्लभते नराः २५
तत्र मृत्युजरादुःखैः सततं समभिद्रुतः संसारे पच्यते जंतुस्तत्कथं नावबुध्यसे २६ अहितेहितसंज्ञस्त्वमध्रुवे ध्रुवसंज्ञकः ।
अनर्थे चार्थसंज्ञस्त्वं किमर्थं नावबुध्यसे २७ संवेष्ट्यमानं बहुभिर्मोहात्तंतुभिरात्मजैः कोषकार इवात्मानं वेष्टयन्नावबुध्य
से २८ अलं परिग्रहे ह्येषो दोषवान् हि परिग्रहः कृमिर्हि कोषकारस्तु बध्यते स्वपरिग्रहात् २९ पुत्रदारकुटुंबेषु सक्ताः सीदंति
जंतवः सरः पंकार्णवमग्ना जीर्णा वनगजा इव ३० महाजालसमाकृष्टान् स्थले मत्स्यानिवोद्धृतान् मोहजालसमाकृष्टान्
पश्य जंतून् दुःखितान् ३१ कुटुंबं पुत्रदारं च शरीरं संचयाश्च ये पारकामक्षं वसर्वे किं संमुक्तत उत्क्रांते ३२ यदा सर्वान् परित्य
ज्य गंतव्यमवशेनेति अनर्थे किं प्रसक्तास्त्वं स्वमर्थं नानुतिष्ठसि ३३ अविश्रांतमनालंबमपाथेयमदैशिकं तमः कांतारमध्वा
नं कथमेको गमिष्यसि ३४ नहि त्वां प्रस्थितं कश्चित् पृष्ठतोनुगमिष्यति सुकृतं दुष्कृतं च त्वां यास्यंतमनुयास्यति ३५ ॥

मो०

४९५

४९५

विद्याकर्मचशौचंचज्ञानंचबहुविस्तरं क्षमैवअरित्राणिनौचालनदंडाः यस्यांधर्मस्थैर्यवटारकानौकर्मतारज्जुर्यस्यां ४२ महाभूतेति पंचभूतानिमहत्तत्त्वबुद्धिः यच्चआत्म

विद्याकर्मचशौचंचज्ञानंचबहुविस्तरं अर्थार्थमनुसार्यंतेसिद्धार्थस्तुविमुच्यते ३६ निबंधनीरज्जुरेषायाग्रामेवसतोरतिः छित्वै

तांसुकृतोयांतिनैनांछिंदंतिदुष्कृतः ३७ रूपकूलांमनःस्रोतांस्पर्शद्वीपांरसावहां गंधपंकांशब्दजलांस्वर्गमार्गदुरावहां ३८

क्षमारित्रांसत्यमयींधर्मस्थैर्यवटारकां त्यागवाताध्वगांशीघ्रांनौतार्यांतांनदींतरेत् ३९ त्यजधर्ममधर्मंचतथासत्यानृतेत्य

ज उभेसत्यानृतेत्यक्त्वायेनत्यजसितंत्यज ४० त्यजधर्ममसंकल्पादधर्मंचाप्यलिप्सया उभेसत्यानृतेबुध्याबुद्धिंपरमनिश्च

यात् ४१ अस्थिस्थूणंस्नायुयुतंमांसशोणितलेपनं चर्मावनद्धंदुर्गंधिपूर्णंमूत्रपुरीषयोः ४२ जराशोकसमाविष्टंरोगा

यतनमातुरं रजस्वलमनित्यंचभूतावासमिमंत्यज ४३ इदंविश्वंजगत्सर्वमजगच्चापियद्भवेत् महाभूतात्मकंसर्वंमह

द्यत्परमाणुयत् ४४ इंद्रियाणिचपंचैवतमः सत्वंरजस्तथा इत्येषसप्तदशकोराशिरव्यक्तसंज्ञकः ४५ सर्वैरिहें

द्रियार्थैश्चव्यक्ताव्यक्तैर्हिसंहितः चतुर्विंशकइत्येषव्यक्ताव्यक्तमयोगुणः ४६ ॥ ॥ ॥ ॥

ग्म० ४९५

यात्तेहात्परंपरलोकगामिएषसप्तदशकः इंद्रियाणिपंचचकारात्पंचप्राणाः तमआदित्रयंएकमिति ४४ इंद्रियार्थैः आदिभिः शब्दादिभिः पंचभिः मनसोबुद्धेरहं

कारस्यचार्थैः सहाष्टभिः एवंचतुर्विंशकः ४५ ४६

५१ रिष्यते ५२ हिंस्यते ५३ तीर्थवित्मोक्षोपायवित् ५३ ५४ ५५ ५६ ५७ ५८ ॥ ॥ ॥ ॥

एतैस्सर्वैः समायुक्तः पुमानित्यभिधीयते त्रिवर्गंतुसुखंदुःखंजीवितंमरणंतथा ४७ यइदंवेदतत्वेनसवेदप्रभवाप्ययो
पारंपर्येणबोद्धव्यंज्ञानानांमायत्रकिंचन ४८ इंद्रियैर्गृह्यतेयद्यत्तत्तद्व्यक्तमितिस्थितिः अव्यक्तमितिविज्ञेयंलिंगग्राह्यमती
द्रियं ४९ इंद्रियैर्नियतैर्देहीधारा भिरिवतर्प्यते लोकेविततमात्मानंलोकंचात्मनिपश्यति ५० परावरदृशः शक्तिर्ज्ञा
नमूलाननश्यति पश्यतःसर्वभूतानिसर्वावस्थासुसर्वदा ५१ सर्वभूतस्यसंयोगोनाशुभेनोपपद्यते ज्ञानेनविविधान्क्लेशा
नतिवृत्तस्यमोहजान् ५२ लोकेबुद्धिप्रकाशेनलोकमार्गोनरिष्यते अनादिनिधनंजंतुमात्मनिस्थितमव्ययं ५३ ।
अकर्तारममूर्तंचभगवानाहतीर्थवित् योजंतुःस्वकृतैस्तैस्तैः कर्मभिर्नित्यदुःखितः ५४ सदुःखप्रतिघातार्थंहंतिजंतू
ननेकधा ततःकर्मसमादत्तेपुनरन्यन्नवंबहु ५५ तप्यतेथपुनस्तेनभुक्त्वापथ्यमिवातुरः अजस्रमेवमोहांधोदुःखेषु
सुखसंज्ञितः ५६ वध्यतेमथ्यतेचैवकर्मभिर्मंथवत्सदा ततोनिबद्धःस्वांयोनिंकर्मणामुदयादिह ५७ परिभ्रमतिसंसारं
चक्रवद्बहुवेदनः सत्वंनिवृत्तबंधस्तुनिवृत्तश्चापिकर्मतः ५८ ॥ ॥ ॥ ॥ ॥

संयमेनधारणाध्यानसमाध्यात्मकेनानवंदृष्टिमात्रेणोत्पन्नं ४९ अध्यायः श्लोकं १७ द्वावनर्थौ इष्टस्यानिष्टस्यविनाशः स्वशरीरतापश्च २ ६ १० १२

सर्ववित्सर्वजित्सिद्धोभवभावविवर्जितः संयमेननवंबंधंनिवर्त्त्येतपसोबलात् संप्राप्ताबहवः सिद्धिमप्यबाधांसुखोदयं ४९ शां
तेमोक्षधर्मेषु नारदउवाच अशोकंशोकनाशार्थंशास्त्रंशांतिकरंशिवं निशम्यलभतेबुद्धिंतांलब्ध्वासुखमेधते १ शोक
स्थानसहस्राणिभयस्थानशतानिच दिवसेदिवसेमूढमाविशंतिनपंडितं २ तस्मादनिष्टनाशार्थमितिहासंनिबोधमे तिष्ठ
तेचेद्वशेबुद्धिर्लभतेशोकनाशनं अनिष्टसंप्रयोगाच्चविप्रयोगात्प्रियस्यच मनुष्यामानसैर्दुःखैर्युज्यंतेस्वल्पबुद्धयः ४ द्र
व्येषुसमतीतेषुयेगुणास्तान्नचिंतयेत् नतानाद्रियमाणस्यस्नेहबंधःप्रमुच्यते ५ दोषदर्शीभवेत्तत्रयत्ररागःप्रवर्त्तते
अनिष्टवर्द्धितंपश्येत्तथाक्षिप्रंविरज्यते ७ नार्थोनधर्मोनयशोयोतीतमनुशोचति अप्यभावेनयुज्येततच्चास्यननिव
र्त्तते ८ गुणैर्भूतानियुज्यंतेवियुज्यंतेतथैवच सर्वाणिनैतदेकस्यशोकस्थानंहिविद्यते ९ मृतंवायदिवानष्टंयोतीतम
नुशोचति दुःखेनलभतेदुःखंद्वावनर्थौप्रपद्यते १० नाश्रुकुर्वंतियेबुद्ध्यादृष्ट्वालोकेषुसंततिं सम्यक्प्रपश्यतःसर्वंना
श्रुकर्मोपपद्यते ११ दुःखोपघातेशारीरेमानसेचाप्युपस्थिते यस्मिन्नशक्यतेकर्तुंयत्नस्तन्नानुचिंतयेत् १२ ॥॥

भैषज्यमेतदुःखस्ययदेतन्नानुचिंतयेत् चिंत्यमानंहिनव्येतिभूयश्चापिप्रवर्द्धते १३ प्रज्ञयामानसंदुःखंहन्याच्छारीरमौषधैः एतद्विज्ञानसा
मर्थ्यंनबालैःसमतामियात् १४ अनित्यंयौवनंरूपंजीवितंद्रव्यसंचयः आरोग्यंप्रियसंवासोगृध्येत्तत्रनपंडितः १५ नजानपदिकंदुःख
मेकःशोचितुमर्हति अशोचन्प्रतिकुर्वीतयदिपश्येदुपक्रमं १६ सुखाद्बहुतरंदुःखंजीवितेनात्रसंशयः स्निग्धत्वंचेंद्रियार्थेषुमोहान्म
रणमप्रियं १७ परित्यजतियोदुःखंसुखंवाप्युभयंनरः अभ्येतिब्रह्मसोत्यंतंनतंशोचंतिपंडिताः १८ सर्वतेदुःखमर्थाहिपालनेन
चतेसुखाः दुःखेनचाधिगम्यंतेनाशमेषांनचिंतयेत् १९ अन्यामन्यांधनावस्थांप्राप्यवैशेषिकींनराः अतृप्तायांतिविध्वंसंसंतोषं
यांतिपंडिताः सर्वेक्षयांतानिचयाःपतनांताःसमुच्छ्रयाः संयोगाविप्रयोगांतामरणांतंहिजीवितं २० अंतोनास्तिपिपासायास्तु
ष्टिस्तुपरमंसुखं तस्मात्संतोषमेवेहधनंपश्यंतिपंडिताः २१ निमेषमात्रमपिहिवयोगच्छन्नतिष्ठति स्वशरीरेष्वनित्येषुनित्यंकिमनु
चिंतयेत् २२ भूतेषुभावंसंचिंत्ययेबुध्वामनसःपरं नशोचंतिगताध्वानःपश्यंतःपरमांगतिं २३ संचिन्वानकमेवेनंकामानामवितृप्त
मकं व्याघ्रःपशुमिवासाद्यमृत्युरादायगच्छति २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मो० ४६७

497

३० अध्यायः विपर्यासः सुखेदुःखधीः दुःखेसुखधीः १ ३ विधित्साभिः विधासाभिः तृष्णाभिः ५ अत्ययः पौर्वापर्ये ६ ॥ ॥ ६ ॥

तथाप्युपायंसंपश्येत्दुःखस्यपरिमोक्षणं अशोचन्नारभेत्वैवमुक्तश्चाव्यसनीभवेत् २५ शब्देस्पर्शेचरूपेचगंधेषुचरसेषु
च नोपभोगात्परंकिंचिद्धनिनोवाधनस्यवा २६ प्राक्संप्रयोगाद्भूतानांनास्तिदुःखंपरायणं विप्रयोगात्तुसर्वस्यनशोचेत्प्रकृति
स्थितः २७ धृत्याशिश्नोदरंरक्षेत्पाणिपादंचचक्षुषा चक्षुःश्रोत्रेचमनसामनोवाचंचविद्यया २८ प्रणयंप्रतिसंहृत्यसंस्तु
तेष्वितरेषुच विचरेदसमुन्नद्धःससुखीसचपंडितः २९ अध्यात्मरतिरासीनोनिरपेक्षोनिरामिषः आत्मनैवसहायेनयश्चरेत्ससु
खीभवेत् ३० शांतौमोक्षधर्मेबुसुकाभियतने नारदउवाच सुखदुःखविपर्यासोयदासमुपपद्यते नैनंप्रज्ञासुनीतंवा
त्रायतेनापिपौरुषं १ स्वभावाद्यत्नमातिष्ठेद्यत्नवान्नावसीदति जरामरणरोगेभ्यः प्रियमात्मानमुद्धरेत् २ रुजंतिहिशरी
राणिरोगाःशारीरमानसाः सायकाइवतीक्ष्णाग्राःप्रयुक्तादृढधन्विभिः ३ व्यथितस्यविविधित्साभिस्ताम्यतोजीवितैषिणः
अवशस्यविनाशायशरीरमपकृष्यते ४ स्रवंतिननिवर्त्तंतेस्रोतांसिसरितामिव आयुरादायमर्त्यानांरात्र्यहानिपुनःपु
नः ५ व्यत्ययोह्ययमत्यंतंपक्षयोःशुक्लकृष्णयोः जातान्मर्त्यान्जरयतिनिमेषान्नावतिष्ठते ६ ॥ ॥ ॥ ॥